३४५

वेदान्तसारटीका

विद्वन्मनो

पा. ९-४८

३३

वे॰टी॰

१ ॐ तत्सत् सत्यं ज्ञानमनन्तं परिपूर्णानन्दविग्रहं रामं॥ प्रत्यंचमनन्तं विश्वस्य स्थितिस्थिरस्य यस्य यं वन्दे॥१ वाणीकायमनोभिः श्री
गुरुविद्यागुरून्नमस्कृत्य वेदान्तसारटीकां कुर्वे श्रद्धावशाद्यथाबुद्धि॥२॥ चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्र
चयगमनशिष्टाचारपरिपालनफलं विशिष्टशिष्टाचारानुमितस्मृतिपरिकल्पितश्रुतिबोधितकर्तव्यताकं स्वाभिमत
देवतातत्त्वानुसंधानात्मकं मंगलमाचरन्नखण्डमित्यादिश्लोकेन आत्मानमाश्रये इत्यन्वयः यद्यपि ग्रन्थकरणादिकार्यार
म्भेगणेशसरस्वत्यादिदेवताभेदं विघ्नविघातकं विद्यास्फूर्तिप्रदत्वेन प्रसिद्धमनुसंधानं कुर्वन्ति विशिष्टास्तथाप्येषु एव
सर्वे देवा इति श्रुतेरात्मन एव सर्वदेवतात्मकत्वावगमादात्मानुसंधाने कृते सर्वदेवतानुसंधानं संभवतीति मन्यते ग्रन्थकारः प्र
त्यग्भिन्नं विशुद्धचिद्रूपं त्वंपदलक्ष्यं तुरीयमाश्रये शास्त्राचार्यप्रसादाभिव्यक्तमनुसंदधे अस्यात्मनस्तत्पदलक्ष्यपरमात्मानम

श्रीमत्स्वयम्प्रकाशायनमः अखण्डं सच्चिदानन्दमवाङ्मनसगोचरं॥ आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये १

भेदं वक्ष्यन् विशिनष्टि अखण्डमिति अखण्डं सच्चिदानन्दमिति आनन्दादयः प्रधानस्येति न्यायेन सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मे
ति श्रुत्योः परस्परैकवाक्यतामभिप्रेत्याखण्डसच्चिदानन्दपदस्य समासः अखण्डपदोऽनन्तपर्यायः स चाविद्यातत्कार्यदेशकालवस्तुभिः परमा
त्मनः परिच्छेदं व्यावर्तयत्येवमनन्तपदयोगात् तदुक्तं तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणमिति इतराणि तु पदानि स्वार्थोपनिषा
र्पणेनैव सविशेष्यस्यार्थत्वात् ब्रह्मलक्षयन्तीति तदुक्तं स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणमिति परिशिष्टौ सत्यज्ञानशब्दौ विसर्गौ
खण्डं सच्चिदानन्दं स्वमात्मानमवाप्यादिस्वरूपमाह सादिति सत्त्वं नाम अबाधाभावोपलक्षितं स्वरूपं सत्तात्मकमिति यावत् चित्स्वरूपत्वं नित्यो निर
विच्छिन्नारोपप्रसंगात् भूमस्य सत्यसाक्षित्वं चिदेव सर्वशून्यवादानुपपत्तेः साक्षिकत्वे तु तदाश्रयस्य प्रकाशत्वे च वस्तुनाम आत्मनो न सुखात्तदभ्यु
दयसर्थः अखण्डं सत्यमेव नमो वक्तुं किं न स्यादित्यत आह चिदिति चिज्ज्ञानं च विषयितिपर्यायः श्रुतौ ज्ञानं ब्रह्मेति सामानाधिकरण्यात् गुणाश्रयत्वात्तदनुपपत्तेः

रामायण २

१

अखंडं सच्चिदानंदं ब्रह्मात्मानमाश्रय इति ब्रह्मात्मपदयोः सामानाधिकरण्येन तत्त्वंपदार्थयोरैक्यं वाक्यार्थः ब्रह्मत्व
पारोक्ष्यनिवृत्त्या परिपूर्णतया निरूपितः स्यात् अन्यथा एतेषां च पदानां ब्रह्मपदेन प्रत्येकं प्रथमसमन्वितानां पश्चात् सामाना
धिकरण्येन परस्परमपि संबंधसिद्धिः अरुणयापिंगाक्ष्यैकहायन्या सोमं क्रीणातीत्यत्र यथा चिपदान्वितानामरुणादि
पदानामिव परस्परान्वयः न चैकार्थत्वेनास्यादिपदानां पर्यायतापत्तिः प्रयोगपर्यायं चेति वाच्यं प्रवृत्तिनिमित्तभेदाद्भावत्वभेदा
च्चोक्तदोषानवतारात् एवमन्योपि वाक्यविचारोपयोगी न्यायकूहनीयो विस्तरभियो नेह लिख्यते एवंविधिमुखेन परिच्छिन्ना
नतजडदुःखरूपानात्मतद्धर्मविलक्षणं ब्रह्मेति निरूपेदं नो नेति नेत्यस्थूलमनण्वाचोति वर्तते अप्राप्य मनसा सहेत्या
दिश्रुतिमाश्रित्य निषेधमुखेन सकलनिषेधावधिभूतं सत्यस्य सत्यं ब्रह्मेति दर्शयन् वाङ्मनसगोचरमिति वाक्च मनश्च
वाङ्मनसे तयोर्गोचरो वाङ्मनसगोचरो न वाङ्मनसगोचरो अवाङ्मनसगोचरस्तदिति विग्रहः नैव वाचा न म
१८ नसा प्राप्तुं शक्यो न चक्षुषा अस्तीत्येवोपलब्धव्य इति च काठकश्रुतेः एवं विधिनिषेधाभ्यां ब्रह्मणः स्वरूपलक्षणमभिधा
यतदस्तितत्स्वरूपं तटस्थलक्षणेन संभावयति अखिलाधारमिति अखिलस्याकाशादिप्रपंचस्याधारमाश्रयस्तदिति वि
ग्रहः आश्रयशब्दः सृष्टिप्रलययोरप्युपलक्षणार्थः तथा च श्रुतिः यतो वा इमानि भूतानि जायंते येन जातानि जीवंति
यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति ततश्च जगदुत्पत्तिस्थितिलयकारणं ब्रह्मेत्युक्तं भवति अत इदं फलितं सत्यं
ज्ञानानंतानंदैकरसं ब्रह्म तत्पदलक्ष्यमिति आत्मपदेन त्वंपदार्थशुद्धिः आत्मेत्येवोपासीतात्र ह्येते सर्वे एकीभवंतीति
श्रुतावात्मशब्दस्य निर्विशेषप्रत्यक्चैतन्यमात्रनिष्ठतायां निर्धारितत्वात् तथा च ब्रह्मात्मपदयोः सामानाधिकरण्यादैक्यं वाक्यार्थः सिद्ध
इत्युक्तं तदेवं वाक्यार्थभूतमात्मानमाश्रये किमर्थमभीष्टसिद्धये अभीष्टमप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्तिनिरासलक्षणमु
पत्ताभ्यामस्यमर्थसंग्रहे सामर्थ्यलक्षणस्य तौ सिद्धिः संपत्तिस्तस्येदमर्थमित्यर्थः २

न चाध्यक्षोऽहं रक्तिरित्यस्यादिति वाच्यम्। निर्धर्मकत्वश्रुतिपादकाऽस्थूलादिश्रुतिविरोधात्। किं च ज्ञानस्य नित्यत्वे स्वप्रकाशत्वे च प्रकाशवच्च ब्रह्मस्व
भावानतिरेकात् अनागमापायिधर्मस्य धर्मिणः परमार्थतो भिन्नत्वे प्रमाणाभावात् अनित्यत्वे ज्ञानान्तरस्याप्रसंगात् कार्यस्य सतो ज्ञानस्या
पि कार्यान्तरवत् स्वोपादानगोचरापरोक्षज्ञानजन्यत्वात् ज्ञानोपादानब्रह्मगोचरस्यापि ज्ञानस्य कार्यत्वे तस्यापि तद्वत्समानयोगक्षेमतया कथं
नानवस्था अजन्यत्वे प्रथमे कः प्रद्वेषः तथा च सिद्धा ब्रह्मणो ज्ञानस्वभावता एतेन जीवात्मनोऽपि ज्ञानस्वभावता व्याख्याता वेदितव्या
स्वप्रकाशत्वं चैतत् तु लिखितं प्रकाशजडविलक्षणत्वनिर्देशसामर्थ्यात् तद्देवा ज्योतिषां ज्योतिः तस्य भासा सर्वमिदं विभातीत्यादिश्रुतिः। न
न्वेवमप्येतदसिद्धं ब्रह्म मथि ब्रह्मन नपि ज्ञानस्यैव प्रमाणागोचरम्॥ सुखदुःखाभावेतत्साधनानामप्यतमत्वाभावात् न तावत्स्वसुखदुःखाभा
वसाधनं ब्रह्मस्येक्षितव्यसुखदुःखयोर्नित्यनिवृत्तत्वात् अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुतेः नाप्यन्यगतसुखादिसा
धनं ब्रह्म अन्येषां दृष्टादृष्टसुखदुःख ... प्राप्तिपरिहारार्थलौकिकवैदिकसाधनैर्व्यवसितेः। तस्मान्न सु
खादिसाधनं ब्रह्म नापि दुःखाभावरूपं भावात्मस्वभावताविरोधात् नापि सुखात्मकं तथात्वे प्रमाणाभावादित्यत आह आन
न्दमिति आनन्दं सुखस्वरूपं ननु ब्रह्मण आनन्दात्मकत्वे प्रमाणाभावः विज्ञानमानन्दं ब्रह्म आनन्दो ब्रह्मेति व्यजानात् आनन्द
रूपममृतं यद्विभाति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यादित्यादिश्रुतेः प्रमाणत्वात् न चानन्दं ब्रह्मणो धर्म
धर्मितादात्म्यं काप्यवकाशं लभते श्रुतिस्वारस्यभंगप्रसंगात् न च ब्रह्मण इत्यत्र स्य सुखित्वे परैरपीष्यते आनन्दो विद्यते यस्मिन्नित्या
नन्दं ब्रह्मेति परेषां श्रुतिव्याख्यानमुपहास्यमेव न च ब्रह्मण एतन्नदृश्य दुःखाभावपरं आनन्दो ब्रह्मेति व्यजानादिति भाव
रूपब्रह्मसमानाधिकरणनिर्देशविरोधात् न च प्रियाद्यर्थत्वश्रुतिविरोधः तस्याः वैषयिकप्रीतिनिषेधपरत्वादिति भा
वः यद्यप्यात्मपदमेव हेतोपिपदं तथापि श्रुत्युपरोधात्तदर्थशोधनार्थतया च ब्रह्मपदमध्याहृत्य विशेष्यं बोद्धव्यम् एवं स

वे.सा.
३

संकोचकाभावात् सर्वान्तरे प्रत्यगात्मनि पर्यवस्यतीति निश्चयो निश्चयवचनः सोऽपि तत्त्वमेव निश्चिनोतीति तन्नैकत्वा
द्युपक्रमादिसमानाधिकरण्यात् तस्माद्ब्रह्मविद्यास्य संशीलितॄणां संसारसारतामतिं सादयति विषादयति शिथिलयतीति वाप
रमश्रेयोरूपं प्रत्यगात्मानं सादयति गमयतीति वा दुःखजन्मप्रवृत्त्यादिमूलाज्ञानं सादयत्युन्मूलयतीति वोपनिषत्पदवाच्यार्थे
व प्रमाणं तस्याः प्रमारूपायाः करणम् अतः सर्वस्यापि तत्तद्भागेषु प्रयुज्यमानो ग्रंथराशिरप्युपचारात्प्रमाणमित्युच्यते ॥ तथा
चोपनिषदः प्रमाणं प्रमाकरणमुपनिषत्प्रमाणं वेदान्त इत्यर्थः तदुपकारीणि वेदान्तार्थविचारानुकूलानीति यावत् तद
नुकूलत्वं वेदांतवाक्यप्रमेयासंभावनापोहद्वारा न तु प्रमित्सुत्वेन तन्मूले यामाकांक्षादिविचारणा तत्रत्यांगभावः तथा सति वेदांतवा
क्यानां सापेक्षताप्रसंगात् तदुक्तमपि पक्षैः स्वाध्यायवन्नकरणं घटते विचारेणाप्यंगमस्य परमात्मधियः प्रसक्तो सापे
क्षतापतति वेदगिरस्तत्प्रत्यात्विवृत्तो लालनः प्रमितिजन्मनि तन्न युक्तमिति शरीरमेव शरीरकं तत्र भवो जीवः शारीरकः
स सूच्यते याथात्म्येन निरूप्यते यैस्तानि शारीरकसूत्राणि अथातो ब्रह्मजिज्ञासेत्यादिकानि यद्वा शारीरकसूत्राणि
तद्याथात्म्यवादीनि वेदान्तार्थसंग्रहवाक्यानि आदिशब्देन भाष्यादिसंग्रहार्थः चशब्दो वेदान्तशब्दानुषंगार्थः तथा च वेदाना
मंतोऽवसानभागो वेदान्तः इति व्युत्पत्तियोगात् मुख्यो वेदांतशब्दो वेदविभागान्तरमेव शारीरकादौ तूपचरित इति व्युत्पा
दितः नन्वकिं पुनरस्य ग्रंथस्यारंभे निमित्तं न खलु निर्निमित्ता प्रेक्षावत्प्रवृत्तिरिति चेत् को भावः निमित्तमात्रात्प्रेप्सति विवेक
चेन्न ग्रथनायाघनेकोर्मिमालाकुलसमुद्भूतक्षोभहृतविज्ञानपाथस्तिष्ठतर कामक्रोधाद्युत्तुंगफेनजालविषमेत्सुतदु
हितकलत्रबांधवाद्यनेकमकरनक्रचक्राकुले नरमृगपश्वादिदेवादिस्थानभोगफेनबुद्बुदे संसारसागरे पुनर्पुनर्
तमधऊर्ध्वं तिर्यग्भ्रामं मज्जनोन्मज्जनादिविवशानतिविततगंभीरार्थानेकशाखावेदान्तविचारमहाद्रुमावलंबनासमर्थान् दुःखिनो लोके

ग१

3

एवं शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणलक्षणं मंगलं विधायेदानीं यस्य देवे परा भक्तिर्यथा देवे तथा गुरावित्यादि
शास्त्राद्देवताभक्तिवद्गुरुभक्तेरपि विद्याङ्गत्वप्रतीतेर्देवमिवाचार्यमुपासीतेत्यादिस्मृतेश्च गुर्वाराधनोक्तिपूर्वकं स्वचिकी
र्षितं प्रतिजानीते अर्थतइति श्लोकेन वेदान्तो वक्ष्यमाणलक्षणस्तस्य सारं मथितार्थस्तं वक्ष्ये तच्च यथामति स्वमत्यनुसा
रेण अनेन तथा स्वाप्रवितत्स्यातिगंभीरार्थवेदान्तस्यार्वाग्बुद्धिभिरपरिच्छेदात् तदुक्तमभियुक्तैः गुरुचरणसरोजसन्नि
धानादपि वयमस्य गुणैकलेशभाजः अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीना इति एतच्च गर्वपरिहारोक्ति
वचनं न पुनर्बुद्धिमयानिमित्तं यथाशास्त्रमर्थसंग्रहादित्यर्थः किं कृत्वा गुरूनाराध्य भक्तिश्रद्धातिशयस्तुतिनमस्कारादिना

अर्थतोप्यद्वयानंदानतीतद्वैतभानतः॥ गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति २ वेदांतो नामोपनिषं
त्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च अस्य वेदांतप्रकरणत्वात्तदीयैरनुबंधैः तद्वत्तासिद्धेर्न ते पृथगालोच्याः

देवमिव पूज्यपित्रादिगुरूनिति एकस्मिन्नपि गुरौ वचनं पूजार्थं स्वस्य सांप्रदायिकत्वज्ञापनाय तान्नामतो निर्दिशति अद्वयानंदानिति
नाम्नो द्वित्यादिवत्संज्ञामात्रत्वं व्यावर्तयति अर्थत इति अपिशब्दः शब्दार्थयोः समुच्चयार्थः न केवलं शब्दतः किंत्वर्थतोपीति तत्र
हेतुः अतीतद्वैतभानत इति अतीतं द्वैतं यस्मात्तदतीतद्वैतं प्रत्यगात्मतत्त्वं तस्य भानं साक्षात्कारस्तस्मादतीतद्वैतभानतः
अतीतद्वैतभावत इति पाठे तुल्यज्ञानविध्वस्तनिखिलभेदवृत्तात्त्वादित्यर्थः २ ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु विद्वन्निर्मित
निबंधेषु चाविशेषेण वेदान्तशब्दस्य लोके प्रयोगदर्शनात्सर्वत्र मुख्यत्वे प्राप्ते प्रतीतिकारणमुख्यं गौणभेदेन वेदान्तशब्दं व्युत्पादयति
वेदान्तो नामेत्यादिना उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः उपनिपूर्वस्य क्विप्प्रत्ययान्तस्य षद्लृ विशरणगत्यव
सादनेष्विति धातोरुपनिषदिति रूपं तत्रोपशब्दः सामीप्यमाचष्टे तत्र

हेदाध्ययनं ब्रह्मजिज्ञासाधिकारहेतुः तस्य ब्रह्मधर्मजिज्ञासयोः साधारणत्वात् तस्मान्नेतोह नियमेन प्रवृत्त्यनुपपत्तेः नापि धर्मवि
चारः प्रागपि धर्मविचारादधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः नापि धर्मानुष्ठानमिह जिज्ञासाहेतुः विनापि धर्मानुष्ठानं ब्रह्मच
र्यादेव विरक्तस्य ब्रह्मजिज्ञासादर्शनात् श्रुतिस्मृतिविहितविद्वत्संन्यासविधायिनी यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादि
का ननु जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री
यज्वा ब्रह्मचारी वासीति श्रुतेः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः इति स्मृतेश्च ऋण
त्रयापाकरणमन्तरेण मोक्षस्य विचारप्रवृत्त्ययुक्ततायाः गम्यमानत्वात् कथं धर्ममननुष्ठाय संन्यासपूर्वकविचारे प्रवृत्तिरिति चेत्
उच्यते श्रुतिस्तावत् हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः इति पश्ववदानत्रयविधिमुपक्रम्य तदवदानैरेवावद्यते तदवदाना
4 नामवदानत्वमिमवदाननिर्वचनेनोपसंहारादवदानत्रयविधेरर्थवादत्वान्न स्वार्थपरा श्रुतिः सा ब्रह्मचर्यादेवेति श्रुत्याऽनन्यपर
याबाध्यते यदि ब्रह्मचर्यादिभिरपाकरणीयं ऋणत्रयमप्यवदानैरेवावद्यत इत्यवदानश्रुतेर्ब्रह्मचर्यादेर्ऋणत्रयापाकरणहेतु
त्ववचनं स्वार्थपरमेवेति मतं तथापि जातमात्रस्य ऋणत्रयसंबन्धे प्रमाणाभावादधिकारी जायमानो गृहस्थो वा जायमान इति
वा व्याख्यानमुचितं स्मृतिस्त्वविरक्तविषयतया व्याख्येया एतेन यत्तावद्यजमानः जरया वा ह्यस्मान्मुच्येरन् वीरहा वा एष देवानां योऽग्नि
मुद्वासयते इत्यादिश्रुतयः एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिस्मृतयश्च व्याख्याता वेदितव्याः ब्रह्मचर्यादेव प्रव्रजे
द्यदहरेव विरजेत्तदहरेव प्रव्रजेत् अथ पुनरव्रती वा व्रती वा किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामः
येषां नोऽयमात्मेति याज्ञवल्क्यः प्रव्राजये प्रजामीषिरे ते श्मशानानि भेजिरे ये प्रजां नेषिरे ते अमृतत्वं विभेजिरे इत्यादिश्रुतिस्मृत्यविरो
धात् तस्मान्न धर्मानुष्ठानं ब्रह्मजिज्ञासाहेतुः अतो ब्रह्मजिज्ञासा जायमाना यस्मिन्सत्येव नियमेन जायते यस्मिन्नसति नैव जायते तदे
वतस्याः साधनमेषितव्यं तच्च वक्ष्यमाणं साधनचतुष्टयमेवेति केचिदाहुः साधनसंपन्नस्तत्राह नितान्तेति नितान्तमत्यन्तानिमित्तमुद्धे
श्चान्तमनःकरणस्यस्तथाकृतः श्रान्तस्य नैर्मल्यं प्रतिबंधकरागादिहीनसनातिशलेमाह ।। ।। ।।।।

लोकसंजातकरुणाया निमित्तत्वोपपत्तेः ॥ अथ निमित्तविशेषाक्षेपश्चेत्तत्राह अत्रस्येति शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थि
तम् आहुः प्रकरणं नाम ग्रंथभेदं विपश्चितः इति हि प्रकरणलक्षणं वदति तथा च यच्छास्त्रैकदेशसंबद्धं यत्प्रकरणं तत्तच्छास्त्रीये
रेवानुबंधैरनुबंधवद्भवतु अन्यथा शास्त्रप्रकरणयोर्भिन्नविषयादिमत्त्वेन शास्त्रासंबद्धत्वप्रसंगादसंबद्धप्रलपितमिदमाप
द्येत अतो ग्रंथस्य वेदांतशास्त्रीयप्रकरणत्वाद्वेदान्तशास्त्रादिप्रैरेवानुबंधैः स्तत्वतासिद्धेर्नैतेनुबंधाः पृथगालोचनी
या इत्यर्थः ननु महाविषयादिरिह शास्त्रीयत्वेप्यवांतरविषयादिः पृथगालोचनमुचितं इतरथा शास्त्रपरित्यज्य प्रेक्षा
वतोऽत्र प्रवृत्त्ययोगादित्याशंक्य प्रकरणत्वेनैवान्तरसंगतेः सुलभालोचनत्वात्स्फुटमिह निर्देशानपेक्षणात् तथा हि सार
ग्रहणेच्छुरवान्तराधिकारी सगुणनिर्गुणरूपविषयभेदपरिसंख्यानिर्गुणसारमात्रमिह विषयः तन्मात्रावधारणमवान्तरप्र
योजनं संबंधो विषयानुरूप इति भावः ननु शास्त्रीयोनुबंधः शास्त्राभिप्रिरेव विज्ञायते न च सुस्थितस्तु मिस्तत्र कथमिह

॥ तत्रानुबंधो नामाधिकारी विषयसंबंधप्रयोजनानि अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधिगताखिलवेदार्थो
स्मिन्जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म

तेषां शास्त्रीयविषयासुनाभिज्ञानां प्रवृत्तिरित्याशंक्य शास्त्रीयमेवानुबंधं संक्षेपतो व्युत्पादयितुमुपक्रमते तत्रानुबंधो नामेत्यादिना तत्र
वेदांतशास्त्रस्यार्थप्रतिपत्तारमनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगादादावधिकार्यनुबंधापेक्षा ततस्तस्य च विषयबोधमन्तरेणाप्रवृत्तेर्विषय
स्य तदनंतरं विषयस्य च शास्त्रप्रतिपाद्यत्वसिद्धये संबंधस्य विषयानंतर्यं प्रयोजनस्य चरमत्वं प्रसिद्धमित्युद्देशपाठक्रमो विवक्षि
तः तथा च शारीरकसूत्रं अथातो ब्रह्मजिज्ञासेति तत्र यथोद्देशं क्रममधिकारिणं निरूपयति अधिकारी त्विति धर्मजिज्ञासाधिका
रिणोस्य वैलक्षण्यसूचनार्थस्तु शब्दः प्रमाताधिकारीत्यन्वयः लौकिकवैदिकव्यवहारे प्रमाता जीवः प्रमातेह विवक्षितः जीवमात्र
स्य च ते भ्रमसंभवेन शास्त्रार्थप्रतिपत्त्ययोगात् तस्य तु शब्दसूचितविशेषमाह साधनचतुष्टयसंपन्न इति वक्ष्यमाणसाधनचतुष्ट
यविशिष्ट इत्यर्थः अयं भावः न ताव

काम्यादिपदार्थान् कथयति काम्यानीत्यादिना फलोद्देशेन विधीयमानानि कर्माणि काम्यानि न च विश्वजिता यजेतेत्यादा
वप्राप्तेः तत्रापि स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वादिति न्यायेन स्वर्गफलोद्देशेन विधेः साधितत्वात् ज्योतिष्टोमग्रहणं एका
हिकविषयः आदिशब्दोऽहीनसंग्रहार्थः अनर्थसाधनत्वेष्टसाधनतानिषेधकनञ्पदयोगिवाक्यगम्यानि निषिद्धानि लिङाद्यनुशासन
न्ययोगिवाक्यगम्यानि वा नरकादीत्यादिपदादैहिकदुःखग्रहः ब्राह्मणहननादीत्यादिपदात्सुरापानादिग्रहः प्रत्यवायपदेना
गामिदुःखमुच्यते येषामकरणे विद्यमाने तत्साध्यं तेनाप्यते तानि नित्यानीत्यर्थः अकरणे प्रत्यवायलक्षणानि नित्या
नीति यावत् निर्निमित्तमुपात्तदुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणम् न त्वकरणे प्रत्यवायोत्पादकानि नित्यानीति नन्वकु
र्वन्विहितं कर्म निन्दितं च समाचरन् प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति स्मृतौ शब्दप्रत्यवायः करणस्य प्रत्यवायहेतुत्वमवगम्य

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि नित्यान्यकरणे
प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि चांद्रा
यणादीनि उपासनानि सगुणब्रह्मविषयकानि मानसव्यापाररूपाणि शांडिल्यविद्यादीनि एतेषां नित्यादीनां बुद्धिशुद्धिः परमप्रयो

तेत्कथमकरणस्य प्रत्यवायानुत्पादकत्वमिति चेन्न लक्षणोक्तेः क्रियापाञ्चतिपालेनिनाशानुलक्षणार्थोऽपि विधानात् अत
एव नित्यानुष्ठानकाले निष्फलत्वादिपरवशो नरमालोक्य लिङ्गैर्लक्ष्यते यद्ययं यथावत् नित्यनैमित्तिकानुष्ठानमभवि
ष्यत् तदा संचितदुरितक्षयोऽभविष्यत् न चायं विहितमकार्षीत् ततः प्रत्यवायी भविष्यतीति तथा च विचिकित्सन्त्यज्ञा अपि इति
च्छद प्रत्ययस्याप्युपपत्तेर्नैतद्बलादभावस्य हेतुत्वोक्तिः कार्ययुक्ता तदुक्तं नित्यानामक्रिया यस्माल्लक्षयित्वेति सत्वरा प्रत्य
वायक्रिया तस्माल्लक्षणा कीर्तिता भवेत् इति ननु हेत्वर्थविधानुविधानस्य तुल्यत्वे कथं लक्षणार्थावगम इति चेन्न अभावात् भावोत्पत्तेरनु
पपत्तेरिति विवरामः भावरूपस्य हि कार्यस्याभावस्य कारणमिति प्रत्यक्षादिभिरवधारिते तेन तत्र प्रत्यवायादभावस्य भावहेतुताभ्युपगमो विरु
ध्येत न त्वेवमसति कथं नवाप्यकरणस्य प्रत्यवायलक्षकत्वसिद्धिरिति चेन्न नैवमेतदस्माकमकरणं कर्मणो

निर्गतेति रागादिवासनारूपकल्मषनिवृत्तिरपि कुतस्तत्राह नित्येति काम्यकर्मभिरतस्यानुष्ठीयमानमपि नित्यादिनसा
त्वात्कल्मषनिवृत्तिहेतुः कामवासनया शुद्धिं प्रति बधसंभवात् तथा निषिद्धवर्जनेपापेन प्रतिबंधादित्यभिप्रेत्य नित्यादि
अनुष्ठानं विशिनष्टि काम्यनिषिद्धवर्जनपुरस्सरमिति एवं नित्याद्यनुष्ठानस्य शुद्धिश्चेत्क्रमं विकल्पनियमं व्यावर्त्तयति
अस्मिन् जन्मान्तरे वेत्यनेकजन्मसंसिद्धस्ततो याति परां गतिं न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीत्यादिस्मृतेर्ज
न्मान्तरानुष्ठितस्यापि जन्मान्तरोपकारकत्वसंभवादिति भावः एवं काम्यनिषिद्धवर्जनपुरःसरमिह जन्मनि जन्मान्तरे वानुष्ठितनित्यादि
क्षपितकल्मषस्य विवेकादिसाधनचतुष्टयसंपत्तौ कारणमाह आपाततः इति आपाततो विचारेणेदं पश्यो यथा रत्नमंतरेणाधिग
तोऽखिलो वेदार्थो येनासौ तथा वेदश्चाचो वेदांतविषयः वेदार्थज्ञाने हेतुमाह विधिवदिति ब्राह्मणेन षडंगो वेदो निष्कारणो ध्येयो
ज्ञेयश्चेति वचनान्नित्याध्ययनविध्युपपादितवेदान्तवचोभिर्निरुक्तव्याकरणाद्यंगोपकरणैरनवबुद्धतात्पर्यैर्लिंगैर
धिगताखिलवेदान्तार्थ इत्यर्थः एतदुक्तं भवति वस्तुतः सच्चिदानंदब्रह्मस्वभावोऽप्यात्मानाद्यनिर्वाच्याविद्यासंबंधल
ब्धजीवभावोऽविद्याकामकर्मवशंगतः काम्यनिषिद्धयननवरतमाचरंस्तत्फलमनंतस्वर्गनरकौ भुंजानस्तद्भोगवासनावा
सितस्तदनुरूपं पुनः कर्मफलमित्येवं घटीयंत्रवत् कुलालचक्रवत् चोर्ध्वाधस्तिर्यक्भ्रमणमविश्रममनुभवन् दुःखैः क
दर्थीकृतो दुःखी स्वात्मानं मन्यते एकः काम्यापरो नित्यस्तथा नैमित्तकः परः प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः
न प्राधान्येमनः शुद्धिर्नित्यस्य फलमार्थिकं केवलं प्रत्यवायस्य निवृत्तिस्तु तरस्येतित्यादिपुराणवचनात् तीतानेकजन्मसुकृतया म३
दृष्टिकपुण्यपुंजपरिपाकोदयवशात्काम्यफलेषु जातदोषदृष्टिराध्यात्मिकादिदुःखत्रयं च निषिद्धाचरणफलमाकलयन् काम्यनि
षिद्धे परित्यजन्नीश्वरार्पणबुद्ध्यानुष्ठितनित्यादिक्षपितकल्मषतयातितरां निर्मलस्वान्तो धीतसांगवेदार्थोपातालोनेयालब्ध
विवेकादिसाधनसंपन्नः स्वात्मयाथात्म्यजिज्ञासुः वेदान्ताधिकारीति ८ ९

नैमित्तिकस्य

वा-ऽस्य पापादृष्टस्य तज्जन्माभावमिच्छुः स्वस्य वा निषिद्धक्रियाजन्यत्वात् पापाकामिनापो भवति अथवा इहकपूयचरणा अभ्याशो ह यत्ते कपूयां
योनिमापद्येरन्निति श्रुतेः तस्मादकरणे प्रत्यवायसाधनानि प्रत्यवायसाधकानि नित्यानि व्याख्यानेन सुव्याख्यानमिति संध्यावन्दनादीनीत्या
दिपदात्पञ्चमहायज्ञादिग्रहः निमित्तमात्रमासाद्यावश्यकर्तव्यतया विहितानि नैमित्तिकानि एतदाह पुत्रेति जातेष्टिर्नाम वैश्वान
रं द्वादशकपालं निर्वपेत्पुत्रे जात इति विहिता आदिपदाच्छ्राद्धस्याहिताग्नेर्गृहान्दहत्यग्निरग्नये क्षामवते पुरोडाशमष्टाकपा
लं निर्वपेदित्यादिनोक्तानां क्षामवत्यादीनां ग्रहः उपरागस्नानादेश्च तस्मात्तेनुदाहरणीयं यद्यपि जातेष्टिर्वाक्यशेषे यस्मि

नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि
चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयकानि मानसव्यापाररूपाणि शांडिल्य
विद्यादीनि

८

न्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इंद्रियावी पशुमान्भवतीति पुत्रगामिफलश्रवणान्नैतस्य
मातृकर्तृगामि द्विविधफलानुकूलं जातेष्ट्युदाहरणं तथापि नैमित्तिकस्य स्वरूपमात्रस्य सादृश्योदाहरणं न दुष्यतीति द्रष्टव्यं विहि ८
ताकरणप्रतिषिद्धसेवारूपनिमित्तविशेषानुबंधीनि प्रायश्चित्तानि पापक्षयमात्रोद्देशेन विहितानीति वा आदिपदात्कृ
च्छ्रादिग्रहः शास्त्रबोधिते सगुणब्रह्मणि दीर्घकालादरनैरंतर्योपेतमनोवृत्तिस्थिरीकरणलक्षणान्युपासनानि उपा
सनानां ज्ञानाद्भेदं दर्शयति मानसव्यापाररूपाणीति निदिध्यासनाद्भेदमाह सगुणेति शांडिल्यविद्या नाम सर्वं खल्विदं ब्र
ह्मेत्युपक्रम्य स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप इत्यादिना छांदोग्ये विहिता वाजिनां अग्निरहस्याख्येपि कांडे सत्यं ब्र
ह्मानमुपासीत मनोमयं प्राणशरीरमित्यादावुक्ता हृदारण्यके च मनोमयोऽयं पुरुषो भाः सत्य इत्यादि अस्यभिन्नता विद्या

अनुपलब्धिमात्रस्यापि वक्तव्यत्वेन तेषामेवेशावानुपलब्ध्याऽभावप्रमोत्पत्तिकारणाद्ययोगपदं
अत्रेदं वक्तव्यमभावप्रमायां योग्यानुपलब्धेः कारणत्वमुक्तं किं ज्ञातानुपलब्धेः स्व
रूपसत्तामात्रेणाहोस्विज्ज्ञातानुपलब्धेः नाद्य इत्याह ननावदिति न द्वितीय इत्याह ज्ञाताया इति=३

स्वरूपसत्तामात्रेणाभावप्रमितिविजनकत्वेनेति २

स्वस्वरूपेण प्रत्यवायलक्षकत्वमिष्यते किंतु तद्ज्ञानस्यैव न तु तस्यैव प्रत्यवायजनकत्वमपीति वाच्यं नित्याकरणाज्ञाने प्रत्यवायाभावप्र
संगात् ननु कथं तर्हि भाट्टैरनुपलम्भस्याभावप्रमितिहेतुत्वमिष्यते तार्किकैश्च प्रतिबंधकाभावस्य तत्संसर्गाभावस्य च कारणत्वमिष्यते
इति चेदभ्यासेनेति ब्रूमः तथाहि ननाव योग्यानुपलब्धेः स्वरूपसत्तामात्रेणाभावप्रमितिहेतुत्वमुक्तं तथा सत्यज्ञातकरणकत्वेनाभावस्य
न स्यप्रत्यक्षत्वं भावप्रसंगात् ज्ञाताया एवानुपलब्धेरभावप्रमाहेतुत्वेन तु न स्यैवभावरूपस्याभावज्ञानकारणतावलाद्याप्यतीति प्रति
बंधकाभावः कारणमिति पक्षे स किं दृष्टकारणकलापकुक्षिनिक्षेपः किं वा दृष्टकारणकलापकुक्षौ आद्ये दाहादिकार्यार्थिनः काष्ठा
दिसमवधानाधिगम इव प्रतिबंधकाभावसमधिगमे सत्येव वह्निप्रज्वलनादौ प्रवृत्तिः स्यात् न च तथा प्रवर्त्तमानो दृश्यते अन्यथा सत्यपि
प्रतिबंधकसमवधाने तदभावनिश्चयेन प्रवर्त्तमानस्य कदाचित्कार्यानुदयो न भवेत् ननु सति प्रतियोगिनि तदभावनिश्चयो
भ्रम इति चेत् तर्हि प्रतिबंधकस्यायोग्यत्वेन तदभावोऽप्ययोग्य एवेति न तस्य दृष्टकारणकलापकुक्षिनिक्षेपः नापि द्वितीयः प्रसि
द्धप्रसंगाणामीश्वरतत्त्वानेकप्रयत्न[illegible]यद्दृष्टानां देशकालयोश्च सर्वादिग्रहव्यारक्रियायाश्च भावरूपतया प्रतिबंधका
भावत्वायोगात् तदतिरिक्तस्यैकस्य चित्सर्वकार्यसाधारणकारणस्यैकस्य कस्यचिदभावात् किंच सत्यपि प्रतिबंधके उत्तेजकसमवधा
ने कार्यदर्शनान्न प्रतिबंधकाभावस्य कारणता उत्तेजकाभावविशिष्टप्रतिबंधकाभावस्य कारणत्वे तादृक्प्रतिबंधकाभावेन तदभावाग्र
हान्न तस्य कारणता सिद्धिः न चान्यथा सिद्धनियतपूर्ववर्त्तित्वमपि प्रतिबंधकाभावस्य तदन्वयव्यतिरेकयोर्विरोधिसंसर्गाभावविषयतया सिद्धे
त्वात् तर्हि विरोधिसंसर्गाभावस्यैव कारणत्वे निरुक्तसंसर्गोऽत्र नास्ति हेतुकलापसमवधाने स्थितिर्हि तु समवधाने चोत्पत्तेः स्थितेर्वा विरुद्धकभावस्य वि
रोधित्वप्रसिद्धेस्तदभावस्य सामग्र्यन्तर्भावो विरोधिसंसर्गाभावस्य न संवेद्योऽत्र नास्ति प्रतियोगिनो विरोधित्वासिद्धेः तत्किं आसत्तिन तत्संसर्गाभा
वस्य सामग्रीप्रवेशाद् सम्बन्धान्यायश्च यदुक्तं द्वारत्वादि स्फलमानिक इति नन प्रागभावस्यापि निश्चितस्यैककालवर्त्तित्वेन कारणत्वेऽभावविशिष्टस्य कारणता
लक्षणमप्रसक्तिप्रसंगः न च प्रागभावत्वेनैव कारणत्वे तावन्मात्रे कारणलक्षणाभावात् किंच कारणत्वं नाम धर्मो भावात्मकेऽभावात्मके च यथा
[illegible]नाभावनिष्ठत्वेन तस्य संभवति विरोधिनोर्भावाभावयोराधाराधेयभावानुपपत्तेः स्वभावस्यैवेति [illegible]
ननु [illegible] तथापि [illegible] हेतुकत्वं [illegible]

संयोगपृथक्त्वन्यायेनेति एकस्योभयत्वे संयोगपृथक्त्वमिति जैमिनिसूत्रं एकस्योभयार्थत्वे संयोगपृथक्त्वं नियोजकं प्रमाणं स्यात् पृथक्त्वमुभयत्वं नियामकमिति शेषः तथा च यथैकस्य
खादिरत्वस्य क्रत्वर्थत्वं पुरुषार्थत्वं च खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्वीतेति वाक्याभ्यां तथा बोधितत्वात् तथा मुक्तेः फलान्तरस्य च बोधकवाक्याभ्यामुभयार्थत्वे इत्यर्थः २

नित्यसंयोगः प्रसज्येत यदि च विविदिषार्थं यज्ञाद्यनुष्ठानमपरमिष्येत ततः संसारव्याविद्धतः यज्ञादिरनुष्ठानं स्यादिति चे
त् खादिरवदेकस्य संयोगपृथक्त्वोपपत्तेर्न ननु तर्हि तेनैव न्यायेन कर्मणां मोक्षार्थत्वमपीति शंकनीयं ज्ञानकर्मसमुच्चयपत्ति
प्रकरणात् तथा च न्यायो ऽतएवाग्नीन्धनाद्यनपेक्षेति कर्मणां ज्ञानं प्रत्याराद्दुपकारकत्वं तु स्यात् सर्वापेक्षा च यज्ञादि
श्रुतेरश्ववदिति न्यायात् उक्तं च भाष्यकृद्भिः विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति तदेव स्मृतिः संवादयति तपसेति आ
दिपदात्कषायपक्तिः कर्म्माणीत्यादिस्मृत्यन्तरग्रहः ननु नित्यादेः सत्त्वशुद्धिवत् काम्यफलकत्वे कर्मणां पितृलोको विद्य
या देवलोक सर्व एते पुण्यलोका भवन्तीति श्रुतेर्नित्यानां पितृलोकादिफलपरापीत्येतेति अत आह नित्यनैमित्तिकयोरिति
अत्र प्रायश्चित्ताग्रहणं तस्यानन्तरफलाभावात् न ह्युपात्तदुरितक्षयमन्तरेण तस्य किंचित्फलं श्रुतमस्ति अन्यथास्तु न्यू
तपसा कल्मषं हन्ति विद्ययामृतमश्नुते इत्यादिस्मृतेश्च ॥ नित्यनैमित्तिकयोरुपासनानां चावा
न्तरफल पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेश्च ॥
यत इति विशेषः नित्यनैमित्तिकयोः पितृलोकप्राप्तिरवान्तरफलं । उपासनानां सत्यलोकप्राप्तिरिति विवेकः तद्यथाम्रे फलार्थे नि
र्मिते छायागन्धावित्यनूत्पद्येते इति स्मृत्युक्तछायागन्धवत् पितृलोकफलस्यावान्तरत्वमानुषंगिकत्वं तदुद्देशेन नित्यादेरवि
धानात् विविदिषासंयोगस्य च विधानाच्छुद्धेरेव महाफलत्वमिति भावः ननु पितृलोकस्य कथं नित्यादिसाध्यत्वं आम्ना
दिकर्मसाध्यत्वात् तस्य देवलोकस्य च श्रुत्युक्तं अष्टाशीतिसहस्राणां मुनीनामूर्ध्वरेतसां उत्तरेणार्यम्णः पन्था इत्यादिस्मृतेर्नैष्ठिको
र्ध्वरेतसां आश्रमधर्मसाध्यत्वावगमात्कुतो विद्याफलत्वमिति चेत् अत्र ब्रूमः किं श्राद्धादिनित्यनैमित्तिकस्य

आशिषा व्याहृहरवैश्वानरादिविषयोत्तरग्रहः इदानीमुक्तलक्षणानां नित्यादीनामीश्वरार्पणतयानुष्ठीयमानानां प
रमफलं दर्शयति एतेषामिति आदिपदान्नैमित्तिकप्रायश्चित्तयोर्ग्रहः नित्यादीनामुपात्तदुरितक्षयद्वारा बुद्धिशु
द्धिहेतुत्वमिति द्रष्टव्यं निर्गतनिखिलकल्मषतयेत्युक्तत्वात् नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमित्यादिस्मृतेः
धर्मेण पापमपनुदतीति श्रुतेश्च चित्तशुद्धेः परमप्रयोजनत्वं परंपरया मोक्षसाधनत्वात् तथा च स्मृतिः स्वे स्वे क
र्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु एवं त्वपक्रम्यासक्तबुद्धिः सर्वत्र जितात्मा विग
तस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छतीति तदुक्तं नैष्कर्म्यसिद्धावपि नित्यकर्मानुष्ठानात् धर्मोत्पत्तिः ध
र्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारयाथात्म्यावबोधस्ततो वैराग्यं ततो मुमुक्षुत्वं ततस्तदुपायपर्येषणं ततः सर्वकर्म

एतेषां नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनं उपासनानां तु चित्तैकाग्र्यं तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन
दानेन तपसानाशकेनेत्यादिश्रुतेः ॥

संन्यासस्ततो योगाभ्यासः ततश्चित्तस्य प्रत्यक्प्रवणता ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानं ततोऽविद्योच्छेदस्ततः स्वात्मन्येवावस्थानमि
ति उपासनानां त्विति तुशब्दः कर्मभ्य उपासनायां वैशिष्ट्यद्योतनार्थः तस्य नित्याद्यनुष्ठानापितकल्मषतया विशुद्धस्य चित्तस्य प्रश
स्तप्रकाशितध्येये ध्येये वा विषये ऐकाग्र्यं निश्चलत्वमित्यर्थः सूक्ष्मार्थावधारणसमर्थत्वमिति यावत् पूर्वोक्तश्रुतेरनुष्ठीय
मानानां नित्यादीनामुपात्तदुरितक्षयद्वारा शुद्ध्यादिपरंपरया ज्ञानहेतुत्वे प्रमाणमाह विविदिषंतीति आदिपदात् तपसानाशकेने
ति वाक्यशेषग्रहः विविदिषंतीति विविदिषासंबंधे विधिप्रत्ययोऽनुसंधेयः अपूर्वत्वात् न हि यज्ञादीनां विविदिषासंयोगः पू
र्वं तु प्राप्तो येनानुवादकत्वं वाक्यस्य कल्प्येत ननु यज्ञादीनां यावज्जीवादिवाक्यैर्नावश्यकर्तव्यतया प्राप्तानां विविदिषार्थत्वे नित्या

नं ५

= स्यात्प्रयुक्तमिति वाच्यं । सगुणब्रह्मविदस्तथात्वेपि निर्गुणब्रह्मविद्याधिकारित्वाच्चित्तैकाग्र
ऊर्ध्वं:५

भ्यां विद्यांतरे फलत्वं । वाजसनेयिनस्तु पंचाग्निविद्याधिकारेऽधीयते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां स
त्यमुपासते इत्युदाहृत्य तत्र श्रद्धालवो ये सत्यं ब्रह्मोपासत इति व्याख्येयं ॥ सत्यशब्दस्य ब्रह्मण्येव सकृत्प्रयुक्तत्वादिति ते
रेव व्याख्यातत्वात् ॥ याज्ञवल्क्य आह सप्तर्षिनागवीथ्यंतर्देवलोकं समाश्रिताः तावंत एव मुनयः सर्वारंभविवर्जि
ताः तपसा ब्रह्मचर्येण संगत्यागेन मेधया तत्र गत्वावतिष्ठंते यावदाभूतसंप्लवमिति तस्मादात्यंतिकपुनरावृत्तिर्विद्या ति ७
वतामेवेति युक्तं क्रममुक्तिहेतुत्वाद्विद्यायाः ॥ नचैतर्हि मुक्तेरेव विद्यायाः परमप्रयोजनत्वात्किंते काम्यता या एव पर
मप्रयोजनत्वात् ॥ तस्याविद्या त्वाकारो हि यात्प्रागेव समीतस्य ब्रह्मलोकगमनोपपत्तेः प्राप्य पुण्यकृतांलोकानुषि
त्वा शाश्वतीः समाः इत्यादिस्मृतेश्च सगुणब्रह्मविदोपि ब्रह्मलोकं गतस्य तत्र भोगविद्यावांतरफलं भुक्त्वैव तत्त
त्रैव सन्न चित्तैकाग्र्यद्वारा स्वयं भावितवेदांतवाक्यार्थज्ञानादेवं मुक्तिरिति नियमात् ॥ मयत्वे वै चित्तैकाग्र्यतोपास
नायाः परमप्रयोजनमिति न किंचिद्दुष्यति तस्मात्सर्व एते पुण्यलोका भवंतीति श्रुतेः निर्गुणे मिमितिकयोः फलवत्त्वस्य
वाचनिकत्वान्तथात्वेप्युक्तलक्षणभेदेन काम्यवैधर्म्यात्फलविशेषस्य चाश्रुतत्वादित्येतल्लोकस्य च फलात्मनः कर्म
विशेषाकांक्षितत्वान्नष्टाश्वदग्धरथन्यायेन कर्मणापितल्लोक इति श्रुतिरुपपद्यते काम्यप्रायश्चित्तयोः फलविशे
षोद्देशेन पापक्षयमात्रार्थत्वेन च विधानात् ॥ फलांतराकांक्षाभावात् तथांगावबद्धानामुपासनानां कर्मसमृद्ध्य
र्थत्वादंगावबद्धानामपि प्रतीकोपासनानां ब्रह्मोपासनानां चाभ्युदयफलत्वात्काम्यैकव्रण ब्रह्मोपासनानामवा

कर्मकाम्यवाप्ति अश्लोकत्वेन नित्यादेः पितृलोकः फलं द्वितीये त्वस्य विद्युदेशयफले नैव निराकांक्षत्वात् पि
तृलोकफलसंबंधाभावात् नापि विना विद्यामूर्द्ध्वरेतसां आश्रमधर्ममात्रेणोत्तरमार्गगमनं भवति॥ विद्ययात
दारोहंति यत्र कामाः परागताः न तत्र दक्षिणा यांति नाविद्वांसस्तपस्विन इति श्रुतेर्विद्याविरहिणामुत्तरमार्गनि
षेधात् निर्णीते चैतस्मिन्नाचार्यैः गुणोपसंहारपादे। अनियमः सर्वासामविरोधः शब्दानुमानाभ्यामित्यत्राधिकरणे
स्मृतिनीं पुनरावृत्त्यभावोवगम्यते एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंते इति तेषामिह न पुनरावृत्ति
रित्यपि च॥ यत्पुनरत्रेमभिहेति च विशेषणात्कल्पांतरे आवृत्तिरवगम्यते तद्विद्यारहितानां॥ अनावृत्तिस्तु
विद्यावतां क्रममुक्त्याम्नानादिति द्रष्टव्यं। नन्वेवं सति षष्ठोद्देशगतभाष्यविरोधः तत्र हि महता संरंभेणायं चैवमरण्ये श्र
द्धातप इत्युपासते इति पंचाग्निविद्यागतवाक्यव्याख्यानावसरे गृहस्थानां विद्यारहितानामनंतपेक्षन्यमाश्रमा
दंभाश्रमे चर्यादिभिरपूतत्वान्न स्वधर्मनिष्ठतामात्रेणोत्तरमार्गगतिरस्ति॥ इतरेषां नैष्ठिकवानप्रस्थमुख्य
तेऽप्यविनां तद्विपरीतत्वात्स्वतंत्रतया स्वाश्रमधर्मनिष्ठामात्रेणोत्तरमार्गगतिरपुनरावृत्तिलक्षणा भवेदि
त्याचार्यैरेवं निरूपितं न तत्र दक्षिणा यांति श्रुतिः परमसमुच्चयपरेति च व्याख्यानं तत्कृत एवं विभागवचनं इति चेत्सत्यं ऊर्द्ध्व
रेतसामुत्तरमार्गेण ब्रह्मलोकगमनं विद्यां विना पि इत्येतावन्मात्रं तत्रोक्तं न पुनरावृत्तिरपुनरावृत्तिस्तत्र विवक्षिता
आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इत्याद्येतिकाऽमृतत्ववचनोदाहरणात् गुणोपसंहारे च तस्मादिह श्रद्धातपो

पुनरावृत्तिमूर्द्ध्वरेतसामानंतर्ये किंतु गमनमात्रं अत्रोनु देवलोकप्राप्तिर्ब्रह्मलोकगतानां ×२

ति अन्यद्विजानाति तदल्पम्। अथ यदल्पं तन्मर्त्यमित्यादिश्रुतिवचनेभ्योऽवसेयोऽन्यत्र भेदप्रपंचेऽनित्यत्वं तत्स्वेव पुंसः प्रतिभाति
तथानुमानमपि विमतोऽचेतनवर्गोऽनित्यो विभक्तत्वाद्घटपटस्तम्भादिवदिति अनेन हि विभक्तस्यानित्यत्वेऽवगते तस्मिन्न
नुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमप्यर्थादवगम्यते आकाशादेरपि नित्यत्वसाधनेनानित्यत्वमुत्तरत्र वर्ण
यिष्यामः न चैवं श्रुत्यनुमानाभ्यां विवेके सति ब्रह्मणोऽज्ञातत्वादनन्तरं विचारो नेति वाच्यम्। आपाततो नित्यं वस्तु ब्रह्मैवावग
म्यते तस्याद्वितीयत्वप्रत्यगभिन्नत्वादेरनिर्धारणात् जिज्ञासाया अनिवृत्तेरित्यभिप्रायो विस्तरः ऐहिकानामिति इह लोके भवा
ऐहिकाः प्रतिपन्नशरीरसंबन्धिनः स्रक्चन्दनवनितादय इहेत्युपलक्षणमप्सरआदिविषयजन्यसुखरूपाः भोगाः भुज्यन्त इति ग्रहादि

ऐहिकानां स्रक्चन्दनादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववत् आमुष्मिकाणाम
प्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः

कर्मजन्या अनित्या यथा दृष्टाः एवमामुष्मिका अप्यमृतादिविषयसेवाजन्यानन्दा यागादिकर्मजन्यत्वादनित्या भवि
ष्यन्तीति निश्चित्य तेभ्यो नितरां छर्दितान्नवत् जुगुप्सेहामुत्रार्थफलभोगविराग इत्यर्थः अयं भावः सुखं मे निरतिशयं भूया
द्दुःखं मे माभूदित्याशामात्रमपीत्यखिलप्राणिनामस्त्यभिनिवेशः ते चैवमभिनिविष्टाः पुरुषाकारबलेन न सर्वोऽसा
दयन्तोऽपि न लभन्ते सुखमात्यन्तिकं दुःखाभावं च कथं केचित्समुद्रयानराजसेवनादिकष्टमनुभूय फलकाले
स्वयं नश्यन्ति केचित्प्राप्तफला अपि व्याध्याद्युपद्रुताः सन्तो भोगं न लभन्ते केचित्तु प्राप्तभोगा अपि भोग्यभार्यापुत्रादि
विनाशाद्दावदहनादिभिः ईर्ष्यासहस्पर्धासूयादिभिः संचितभोग्यजातस्य नाशभयेनाग्न्यादिभिः सन्तापादिभिश्च हत

८

विद्यया देवलोकः इति वचनमित्यलं प्रपंचेन· साधनसंपन्नः प्रमाताधिकारीत्युक्तं त्रुटिः २

तरफलं देवलोकस्थानं वाच्यं ब्रह्मलोक इति परिशेषात्सिद्धमुक्तं तत्र कानि साधनानि कियंतीत्यपेक्षायां तानि विभजते साधना
नीति। विवेकमंतरेण वैराग्यायोगाद्विवेकस्य प्राथम्यं न हीदं हेयमिदमुपादेयमिति विवेचनमंतरेण हेयाद्राग निवृत्तिः सं
भवति अनिवृत्तरागस्य शमाद्यभावात् शमाद्यपेक्षया विरागस्य पूर्वमुद्देशः शांतादिहीनस्य मुमुक्षायोगात्ततः प्रागेव श
माद्युद्देशः एतैस्त्रिभिः साधनैः संपन्नस्य मुमुक्षाया अवश्यंभावात्तस्याश्च सर्वांत्यप्रसजितायां नियमेन प्रवृत्तेः मुमुक्षांता
न्येव साधनानि इत्यभिप्रायः॥ विवेकादीन्पृथक्क्रमेण लक्षयति। नित्यानित्यवस्तुविवेकस्तावदित्यादिना· नित्यत्वं नाम
कालानवच्छिन्नत्वं अनित्यत्वं नाम तद्विपरीतत्वं नस्थास्यतीति लोकागमयोर्व्यवहारयोग्यं नित्यं· तद्विपरीतमनित्यमि
ति वा· तथा चानित्यानित्ये च ते वस्तुनी च नित्यानित्यवस्तुनी तयोर्विवेक इति विग्रहः। केचित्तु नित्यानित्ययो वंसितुंशीलं

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसंपत्मुमुक्षुत्वानि
नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनं नित्यानित्यवस्तुविवेकः

ययोस्ते· नित्यानित्यवस्तुनी नित्यत्वमनित्यत्वं च तयोः साश्रययोर्विवेको नित्यानित्यवस्तुविवेक इत्याहुः। सच्चापाततोऽधिगतवेदार्थ
स्यानुमानकुशलस्य ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमचेतनमनित्यमिति विवेको भवति। तथाहि यस्मादर्वाक् संवत्सरोऽहोभिः परि
वर्त्तते तद्देवा ज्योतिषां ज्योतिः नित्यो विभुः सर्वगतः सुसूक्ष्मः· आकाशवत्सर्वगतश्च नित्यः। अजो नित्यः शाश्वतः। सत्यं ज्ञानमनंतं ब्रह्म· सवि
ज्ञानं ब्रह्म· एतेन तु: क्षायणं· यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतमित्यादि श्रुतिभ्यो
ब्रह्मणो नित्यत्वं विशुद्धसत्वस्य पुंसः प्रतिभाति तथा नेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत् आत्मा वा इदमेक एवाग्र आ
सीन्नान्यत्किंचन मिषत् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेतीति नेह नानास्ति किंचन· यत्रान्यत्पश्यत्यन्यच्छृणो

दिव्यतिरिक्तविषयेभ्यः उपरमणं पुनर्विषयप्रवृत्त्यनुत्पादकरणेन स्थिरीकरणमुपरतिरित्यर्थः नन्वशमदमयो
र्लक्षणेऽस्मिन्नुपरतिलक्षणे संकीर्णं प्रतिभाति बहिः प्रवृत्तेन्द्रियव्यापारनिरोधात्मकस्य लक्षणार्थस्य तुल्यत्वादित्यप
रितो वा प्रकारान्तरेणोपरतिं लक्षयति अथवेति विहितानामावश्यकर्तव्यतया चोदितानां संध्यावंदनाग्निहोत्रादीनां
कर्मणां विधिना तद्वेदे प्राजापत्यामेवेष्टिं कुर्वीत प्राजापत्यां निरूप्येष्टिं सार्ववेदसदक्षिणां आत्मन्यग्नीन्समारोप्य ब्रा
ह्मणः प्रव्रजेद्गृहादिति श्रुतिस्मृत्युक्तमार्गेण परित्यागः परिव्रजनं संन्यास उपरतिरित्यर्थः शमादिवत्संन्यासोऽप्या
त्मज्ञानान्तरंगत्वादवश्यं मुमुक्षुणोपादेयः तथा च श्रुतयः न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः वे

20

शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो
निवर्तनं निवर्तितानां च सर्वेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणमुपरतिः ॥ अथवा विहितानां
कर्मणां विधिना परित्यागः ॥

दान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः एतमेव लोकमीप्सन्तः प्रव्राजिनः प्रव्रजन्ति पुत्रैष
णायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति तानि वा एतान्यवराणि तपांसि न्यास एव
वात्यरेचयदित्याद्याः स्मृतयश्च नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति त्वंपदार्थविचाराय संन्यासः सर्वक
र्मणां अर्थस्य मूलं निकृतिः क्षमा च कामस्य मूलं च वपुर्वयश्च धर्मस्य यागादि दया दमश्च मोक्षस्य ॥ ॥

मपि सुखमलभमानाः कृष्यादिरिक्ताः काणाकुब्जक्लीबबधिरादयो बुभुक्षापिपासार्दिता बहुलमुपलभ्यन्ते ॥ एवं दुःखबहुले संसा रे सुखलवमात्रमनुभवन्तोपि कृपणा बहिर्मुखचित्ता न सक्नुवन्ति किन्तु विरज्यन्त एवेति नन्वस्त्वेव मैहिकं सुखमनित्यत्वाद्देहमदु ष्टत्वाद्धि रागास्पदं तथापि न पारलौकिकादपि विरक्तिरुपपद्यते तस्य स्थिरसुखत्वानुमानस्याक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति श्रुतिबाधितविषयस्यानुत्थानादिति चेन्मैवम् तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षी यत इति श्रुत्या तस्य बलाबलत्वेनेन प्रवृत्त्यानन्यपरत्वात् सापेक्षत्वात्पफलविषयकार्याः प्राधान्यपलक्षणप्या विधेकवा क्यत्वेनान्यपरत्वात्तस्या एव बाधितत्वात् नहि जन्यं नित्यं भावरूपं दृष्टं अतएव हि कं भोगा वदेवा ब्रह्मस्तंब पर्यन्तेषु भोगेषु

शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः

वैराग्यमुपपद्यत इति तदुक्तं भगवता व्यासेन यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्ह तः षोडशीं कलामिति शमादीन्विभजते शमादय इति मनसो बहिःप्रवृत्तौ बाह्येन्द्रियाणां द्वारत्वात्तन्निरोधमुद्दे शेन मनसो निग्रहः प्राक् उद्दिष्टं तत्र शमो द्विविधः पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रयवागूपाकवत् मनसो तः करणस्य निग्रहो विषयेभ्यो बलादाकर्षणं तथा सत्यपि तावत्सु तेषु श्रवणादिविषयेभ्यो विनिग्रहः प्राप्ते तन्निग्रहस्य श्रवणानुकूलत्वाभावादनर्थकत्वमित्याशंक्याह निग्रहं विधिनष्टि श्रवणादीति मननादिसंग्रहार्थमादिपदं एवमुत्तरत्रापि द्रष्टव्यं तद्व्यतिरिक्तेभ्यस्तु श्रवणादिसहकारिभ्योर्थः निवर्तितानां तेषां बाह्यान्तरिन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः श्रवणा

प्राप्तवत्कामत्वान्नरस्पिशाचाधिकृतिः मोक्षेच्छायास्त्वात्मविषयतया ऽकामत्वात् अर्थकामः स नातोऽथो ऽकामो निष्काम आप्तकाम आत्म
कामः इति श्रुतेः आत्मकामस्याप्तकामत्वेनाकामत्वावगमादिति विद्याधिकारिणः शमादिसाधनवत्त्वे श्रुतिं प्रमाणयति ॥ शान्तो दा
न्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति काण्वाः पठन्ति समाहित इत्यस्य स्थाने श्रद्धावित्तो भूत्वेति
माध्यंदिनास्तत्र शमपदार्थमनुस्मृत्य नयुक्त्योपसंहरन्नाह यमाग्नि स्नेहस्थमादयः शब्दनिर्दिष्टा इति द्रष्टव्यम् शमादेर्विद्याहेतुत्वं भगवान्
प्राह योगारूढस्य तस्यैव शमः कारणमुच्यते अर्थात् तस्यकृतः मुक्तेतश्च । यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रियाणीन्द्रियार्थेभ्य
स्तस्य प्रज्ञा प्रतिष्ठितेति सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तां

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं गुरुवेदान्तादिवाक्येषु
विश्वासः श्रद्धा मुमुक्षुत्वं च मोक्षेच्छावत्त्वं एवंभूतः प्रमाताधिकारी शान्तो दान्त इत्यादिश्रुतेः ॥

स्तितिक्षस्व भारतेति समाधावचला बुद्धिः मय्येव मनः आधत्स्व मयि बुद्धिं निवेशयेति श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति च मुमुक्षुत्वेपि मुमुक्षुर्वै शरणमहं प्रपद्ये ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न
निवर्तन्ति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणीति श्रुतिस्मृती द्रष्टव्ये एवंविशेषणविशिष्टो वेदान्ताधिका
रीति निरूपितेऽर्थेऽभियुक्तवचनमुदाहरन्ति उक्तं च प्रशान्तेति प्रशान्तचित्ताय शान्ताय जितेन्द्रियाय दान्ताय प्रहीणदोषाय नितान्
तनिर्मलस्वान्ताय यथोक्तकारिणे काम्यनिषिद्धवर्जनपुरःसरं नित्याद्यनुष्ठानलब्धेश्वरप्रीतये गुणान्विताय विवेकवैरा
ग्योपरतितितिक्षासमाधानयुक्ताय सर्वदा गुरुमनुगताय श्रद्धालवे एवंभूताय मुमुक्षवे एतदात्मज्ञानं सततं गुरुणा देयमिति श्लोकः

सर्वोपरमः क्रियाभावः प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् इत्यादयः । न्यायश्च
पुरुषस्योद्देश्यपरिक्षये यदुपयुक्तमविरोधि च तदुपादेयं विपरीतं तु हेयमिति तदिह ब्रह्मात्मजिज्ञासूनां वेदान्तविचारे क्रियमा
णेन कर्मणा मुख्ययोगोऽनिनापि कर्मतदनुष्ठानसिद्धेः नाप्यविरोधः कर्मविक्षिप्तचित्तस्य वेदान्तार्थनिर्णयाशक्तेः कर्मणां विना
रविरोधित्वात् न चापेतब्रह्मलक्षणकर्मभोक्तृब्रह्माहमस्मीत्यात्मानं विचार्य आत्मा प्रमाणादध्यासविशिष्टात्मप्रतिपत्त्यधी
विरोधेष्वेषु नेषु कर्मस्वधिकारो नाविरुध्यते येनात्मजिज्ञासूनां कर्माणि न त्यक्तव्यानि स्युः तस्मात्प्रवृत्तिस्वरूपक्रियात्यागलक्षणः संन्या
सः कर्तव्यः प्राप्तः सोपरतिरिति भावः ॥ शीतोष्णादीत्यादिपदात् मानापमानलाभालाभशोकहर्षादिग्रहः श्रवणादीत्यादि

शीतोष्णादिद्वन्द्वसहिष्णुत्वं तितिक्षा।

शाब्दे मौनादिसंग्रहार्थः तदनुगुणेत्यत्र गुरुशुश्रूषापुस्तकसंपादनतद्रक्षणादिः श्रवणाद्यनुगुणो विषयो निर्दिश्यते न पुनः सु
खवासस्वान्नादिसंग्रहादेरपि श्रवणाद्यनुकूलत्वात् तदर्थं मठारंभप्रतिग्रहादावपि चित्तसमाधिः कर्तव्य इत्युपदिश्यते दंडमा
च्छादनं कौपीनं परिग्रहेच्छेषं विसृजेदिति संन्यासकाले त्याजितस्य दंडकौपीनाद्यतिरिक्तस्य विना प्रतिप्रसवशास्त्रं संग्रहानुपप
त्तेरित्यर्थः समाधिरैकाग्र्यं तत्परत्वमिति यावत् गुरुवेदान्तादीत्यादिपदात् स्मृतीतिहासपुराणानां ग्रहः विश्वास इदमस्त्येमेव
नान्यथेति गुर्वादिवाक्येषु नियता बुद्धिः सा श्रद्धेत्यर्थः । चरममनुबंधं लक्षयति मुमुक्षुत्वमिति मोक्षो नाम अविद्यानिरस्तो विद्यातत्का
र्यब्रह्मात्मनावस्थानं तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमित्यर्थः ननु यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः अथम
र्त्योऽमृतो भवतीति श्रुतेः सर्वकामविमुक्तस्य मोक्षाधिकारात्कथमिच्छाधिकारिविशेषणमिति चेन्नायं दोषः अनात्मविषयेच्छा

वे॰सा॰टी॰

१२ संतत्यादिभिर्लिङ्गैर्वेदान्तानामद्वैते निरूप्यमाणो ग्रन्थकृत्स्वरूपे ब्रह्मण्येव पर्यवसानदर्शनात् प्रधानादिषु चादर्शनात् ब्रह्मैव वेदान्तविषयो न प्रधा
नादिरित्यर्थः तथा च श्रुतिस्मृती भवतः सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य इति च तृतीयमनुबन्धमाह। संबन्धस्त्विति तदै ४२
क्यप्रमेयस्य ब्रह्मणो रैक्यं तच्च तत्प्रमेयं चेति तथा तस्येति विग्रहः। ननु कथं यथोक्तप्रमेयस्योपनिषत्प्रमाणबोध्यत्वं निर्धर्मके तस्मिन्
शब्दशक्तिजात्यादियोगादिति चेत् को भावः शब्दादिहीनस्य वाच्यत्वानुपपत्तिरिति चेत् न॥ अप्युक्तोपाधिमात्. असंयोगस्य ल
क्षणत्वानुपपत्तिरिति चेत् यथा लक्षणया कथञ्चित् तेन बुद्धेस्तु मे प्रतिबोधस्तथा तत्र अवगच्छामः। चतुर्थमनुबन्धमाह। प्रयोजनं त्विति
ति। तदैक्यप्रमेयपदार्थः पूर्ववत् अज्ञानं वक्ष्यमाणं तस्य निवृत्तिः प्रयोजनमित्येतावन्मुक्ते समूलदुःखोन्मूलनलक्षणत्वे श

तत्रैव वेदान्तानां तात्पर्यात्। संबन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभा
22 वलक्षणः। प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च तरति शोकमात्मविदित्यादिश्रु
तेः ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेः। अयमधिकारी जननमरणादिसंसारानलसंतप्तो प्रदीप्तशिरा जलराशि

मिवाभिमतं प्रयोजनमभ्युपगतं प्रतिभायात् तन्माभूदिति विशेषणान्तरोपादानं। अज्ञाननिवृत्तिमानन्दावाप्तिश्च प्रयोजनमि
त्युक्ते नित्यनिरतिशयसुखाभिव्यक्तिः निःशेषदुःखोच्छित्तिश्च प्रयोजनमिति भाष्याभिमतं प्रयोजनं प्रतिभायात् तन्माभूदिति तत्स्वरूपेषु
के ब्रह्मात्मैक्येतन्मात्रस्य चानन्दरूपत्वं प्रतिपादितमथ स्यात्. विचारजन्यज्ञानस्योक्तोभयविध प्रयोजनमित्यत्र क्रमेण श्रुतीः प्रमाणय
ति। तरतीत्यादिना आत्मवित् आत्मस्वरूपमात्मसाक्षात्कारवान् शोकोपलक्षितसंसारमूलाज्ञानं तरति अतिक्रामति यः कश्चिद् ब्रह्म
परमात्मानं प्रत्यग्रूपं वेद साक्षात्करोति स ब्रह्मैव भवति तद्रूप एव भवतीत्यर्थः। ननु विद्यानिवृत्तेर्विद्यासाध्यत्वेन प्रयोजनत्वेपि स्व
स्वरूपानन्दस्य तथात्वं तस्य नित्यप्राप्तत्वेन विद्यासाध्यत्वाभावादिति चेत् सत्यं नित्यप्राप्तमप्यानन्दात्मस्वरूपमविद्यानिवृत्तौ
अस्याप्तो विस्मृतकण्ठगतचामीकरवदनवाप्तमिव भवति विद्यया लब्धं विद्यया त्रुटिः१ १२

तदेवमधिकार्यनुबंधो निरूपितः इदानीं विषयानुबंधं प्रपंचयति विषय इति जीवब्रह्मणोः परस्परं विभिन्नयोः समानाभि-
हारस्यैकशब्दार्थत्वाज्जीवब्रह्मणोरपि स्वरूपतो भिन्नयोरैक्यं मिथ्याभाव इति शंका स्यात्सा माभूदिति व्याचष्टे शुद्धचैतन्यमिति
चैतन्यस्य शुद्धत्वं सर्वधर्मातीतत्वमेकरसत्वं ननु कथं शुद्धचैतन्यस्य विचारविषयत्वं यावता प्रागपि विचारात्तत्स्वप्रकाशं स्वय-
मेवावभासते इत्याशंक्य स्वरूपेणावभासमानत्वेऽपि परिपूर्णैकब्रह्मानंदप्रत्यक्स्वरूपतायाः प्रत्यायमानत्वाद्विषयत्वोपपत्तिरित्यभि-
प्रेत्याह प्रमेयमिति प्रमेयत्वमज्ञातत्वं अयं भावः प्रत्यगात्मवस्तुनो विषयस्यास्यैतावत्प्रसिद्धौ न विचारप्रवृत्तिः संभवति उद्देश्यवि-
षयाऽप्रसिद्धेः तथापि यावदप्रसिद्धौ च न विचारप्रवृत्तिरनुपयोगात् तथा च केनचिद्रूपेण प्रसिद्धे ब्रह्मात्मवस्तुनि इह विचारेण

इत्थं च प्रशांतचित्ताय जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्स-
ततं मुमुक्षवे वै विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम् ॥ श्रीरामाय नमः ॥ श्रीरामो विजयतेतरां

तदेवं तावन्निर्णये तदिदं ब्रह्मपदस्य निरुक्त्या महत्त्ववति सामान्येन प्रसिद्धत्वादात्मपदस्य च प्रतीतिसामान्येन प्रसिद्धेरयमात्मा ब्रह्मेति सा-
दोषमभिन्नात्मनो देहस्याप्यापाततः प्रसिद्धस्तद्विशेषस्य चापरोक्षस्य सद्वयत्वाद्यनधिकरणत्वस्य देहेंद्रियमनोबुद्धिप्राणाहंकृतिविलक्ष-
णत्वादि प्रत्यगभिन्नसच्चिदानंदानंताद्वयब्रह्मरूपत्वस्य चाप्रसिद्धेः स्यादस्यातः प्रसिद्धवस्तुविशेषे न तद्विशेषानिर्धारणाय विचारप्र-
वृत्त्युपपत्तिरिति यद्वा परोक्षतः प्रसिद्धब्रह्मात्मवस्तुविषय तत्स्वरूपसाक्षात्कारायविचारप्रवृत्त्युपपत्तिरिति तथा च श्रुतिः आत्मावा
अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यात्मसाक्षात्कारमनूद्य तादर्थ्येन मननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां सह श्रवणं
मनुष्ठेयं विधत्ते श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः मत्वा च सततं ध्येय एते दर्शनहेतव इति ननु प्रधानादिना
मापिकाविलक्षणानादिस्फूर्तिसिद्धानंदवेदांतवाक्यविषयत्वात्कथं जीवब्रह्मैक्यस्य विषयत्वं कीर्त्यत इति तत्राह तेनैवेति उपक्रमोप

गुरुः शिष्यं प्रत्याह यत्त्वं देहाज्ञानासितेन मामुपसीदत एतावन्मात्रमहं जानामि विज्ञापयत त्तेतुभ्यं विज्ञापनात् दूरीभविष्यामीत्यर्थः ॥१॥

एतच्चोवाच यदेतस्य तेनमोपसीदत ... त्वं वक्ष्यामीत्यादिश्रुत्यंतरमादिशब्दार्थः ॥ अध्यारोपं सदृष्टांतं लक्षयति असर्पेति
ननु कथमवस्तुनो निरात्मकस्यारोपो यावता क्वचिद्दृष्टपूर्वस्य सतएव क्वचिदारोपो दृष्टः ॥ उक्तं च भगवत्पादाचार्यैः ॥ अध्यासो नाम स्मृते
रूपस्त्वमसत्कथमवस्तुनो निरुपात्तत्वेन सत्ताकमध्यारोप्यते वा नवेति उच्यते संस्कारजन्याहि भ्रमस्तत्संस्कारश्चेत्येवं प्रतीति
मात्रमपेक्षते न तु नः पूर्वप्रतीतस्य परमार्थसत्त्वमपि व्यतिरेकाभावात् संशयविपर्ययहेतुरपि संस्कारकार्यसमुत्पत्तिः सहीना
तु तथाहि लोके नु भवेतस्मिन्नलीककूटममग्गुत्तास्थाणुः पुरुषो वेति संदेह आसीत् अस्मिन् शुक्तिशकले रजतमिति भ्रमः

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोध्यारोपः वस्तु सच्चिदानंदाद्वयं ब्रह्म अज्ञानादिसकलजडसमूहोवस्तु
अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचिदिति वदंति ॥ गोविंदय

आसीदित्यादि न च संशयविपर्यययोरेवेयं स्मृतिर्नतु दृष्टयोरिति वाच्यं अर्थेप्यन्ययोस्तयोः स्मृतिविषयत्वानुपप
त्तेः तस्मान्निरूपाख्यालिकस्याप्यपूर्वपूर्वभ्रमहेतुसंस्कारतोस्त्यारोपोपपत्तेर्भ्रमप्रवाहस्यचानादित्वेनाम्नोस्ना आया
नवस्थादिप्रसंगानवकाशात् युक्ते वस्तुनि परमार्थसति अवस्तुनो निर्वचनीयस्यारोप इत्यर्थः वस्त्ववस्तुनी क्र
मेण लक्षयति वस्त्वित्यादिना नन्वेवं ब्रह्मण एव वस्तुत्वे जीवस्य भ्रमादिव्यावस्तुत्वात्कर्तृत्वाद्यध्यारोपे चाव्याप्तिः
स्यादिति चेन्न। ब्रह्मण एव जीवस्यापि कल्पितत्वात् कर्तृत्वादेः सोपाधिकभ्रमतयोपाध्यनुरक्ते ब्रह्मण्येवाध्यारोपा
त् शुक्त्यादेरपि रजताद्यधिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपचर्यते न पुनस्तस्यैवाधिष्ठानत्वं अज्ञातस्य
स्यारोपाधिष्ठाने न च शुक्त्यादेरज्ञातत्वमस्ति जडत्वात् चिन्मात्रनिष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य ...

विज्ञातचामीकरत्वदर्शिव्यक्तिमापद्यमानमनवाप्तमिव स्वयं परिदृश्यत इति न कश्चिदनुपपत्तिरिति भावः। एवं साधनचतुष्ट
यसंपन्नस्याधिकारिणो विज्ञातविषयादिमत आत्मयाथात्म्यजिज्ञासस्य गुरूपसत्तिं दर्शयति। अयमधिकारी
ति। मरणादीत्यादिपदद्वयगतं घादिः। संसारानलसंतप्तो गुरुमुपसृत्य तमनुसरतीत्यन्वयः। उपसरणं समीप
गमनं। अनुसरणमनुवर्तनमिति भेदः। अमुष्य संसारस्याविलंबेन तच्छान्तिकरस्यान्वेषणे हेतुमाह। प्रदीप्तेति। निदा
घमध्याह्नार्कमरीचिभिर्व्याप्तत्वात् प्रदीप्तशिराः शिशिरतरशुभ्रजलपरिपूर्णो महाह्रदो जलराशिः रिक्तपाणिर्न
सेवेत राजानं दैवतं गुरुमिति वचनमाश्रित्य सोपहारपाणिरिति। उपहार उपायनं पाणौ यस्य स श्रोत्रियं ब्रह्मनिष्ठमिति गु

सि सोपहारपाणिः। श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्या
दिश्रुतेः। सपरमकृपया ध्यारोपापवादन्यायेन तमुपदिशति तस्मै स विद्वानुपसन्नाय आत्मतत्त्वं प्राहेत्यादिश्रुतेः॥

रोर्विशेषणे श्रोत्रियत्वं वेदवेदाङ्गपारगत्वं वेदान्तार्थपारगत्वं वा प्रकृतोपयोगात्। श्रोत्रियग्रहणमकामहतत्वावृजिन
त्वयोरप्युपलक्षणार्थं यश्च श्रोत्रियोऽवृजिनोऽकामहतस्य इति श्रुतेः॥ अकामहतत्वं आब्रह्मलोकानन्दादर्वाचीनेष्वानं
देष्ववितृष्णत्वं अवृजिनत्वं यथोक्तकारितया निष्पापत्वं ब्रह्मनिष्ठत्वमौपनिषद्ब्रह्मात्मविज्ञानपरिपूर्णत्वमित्यर्थः। उ
क्तविधिना यथोक्तगुरूपसर्पणं विद्यार्थिना कर्तव्यमित्यत्र प्रमाणमाह। समिदिति। समिच्छब्दो गुरोरनुरूपोपायनमा
त्रोपलक्षणपरः। आदिशब्दादाचार्यवान्पुरुषो वेद आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदित्यादिश्रुत्यन्तरसंग्रहः।
शिष्योपसत्यनन्तरं गुरोरुपदेशक्रमं दर्शयति। सपरमिति। सः गुरुः परमकृपया प्रपन्नजनक्लेशदर्शनजातकरुणयाति
प्रकाशानन्दस्वभावशीतलपुष्करमालामुचः एव देवादिदयालुत्वस्वभावं याचितेनैव जलवृष्टिवर्षणमिति। उक्तार्थे ज्ञापिकां श्रुतिं पठति

स्वज्ञापितदर्पनोदर्शनात् इदं च नियमेन ज्ञानापनोद्यस्याज्ञानत्वाभ्युपगमात्· प्रागभावस्य च प्रतियोग्युत्पत्तिमात्रवि
रोधिनस्तदपनोद्यत्वाभावात् न ह्यनुत्पन्नः प्रतियोगी कस्यचिदपनोदकः संभवति· अतो नातिव्याप्तिः। नन्वज्ञानस्या
पि ज्ञानोत्पत्तिनान्तरीयकतया विनाशाभ्युपगमात् कथं ज्ञानापनोद्यत्वमिति चेन्न· ज्ञानोत्पत्त्यनन्तरं विलंबाभावाभि
प्रायेण ज्ञाननाश्यस्य ज्ञानोत्पत्तिनान्तरीयकतावाचोयुक्ते राभ्युपगमात् भावाभावयोः क्षणमात्रमपि सहभावानु
पपत्तेरित्यस्ति प्रागभावाद्वैषम्यमज्ञानस्येति· सदसत्त्वाभ्यामनिर्वाच्यमित्यपरं लक्षणं· अत्रापि पूर्ववदेवातिव्या
प्त्यादिपरिहारो द्रष्टव्यः· नेदमसंभवि अज्ञानस्य सत्त्वे चिदात्मवद्बाधाभावप्रसंगात् असत्त्वे च वंध्यासुतादि
वदपरोक्षप्रतिभासानुपपत्तेः बाधप्रतीत्योश्चाज्ञाने प्रसिद्धत्वाद्युक्तं तस्यानिर्वचनीयत्वं सदसत्त्वपक्षयोरुक्तदू
षणमुपजीव्य मिथ्याज्ञानसंस्कारोऽज्ञानमसत्प्रकाशनशक्तिर्वेनासद्वेति मतद्वयं निरसनीयं· मिथ्याज्ञानमात्मनु
तोऽज्ञानमिति पक्षं निरस्यति· त्रिगुणात्मकमिति· गुणा लोहितशुक्लकृष्णा· अज्ञानकार्येषु तेजोबन्नेषूपलब्धा
रप्रकृतिषु प्रसिद्धः। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रुतेः तथा च कार्यानुगतवि
रूपेण कारणमप्यज्ञानमव्याकृतनामकं त्रिरूपेण त्रिगुणात्मकमिति यावत्· तथा च न्यायः ज्योतिरुपक्रमा तु तथा ह्य
धीयत एक इति· यद्वा रजःसत्त्वतमोलक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं त्रिगुणात्मकं गुणगुणिनोरभेदविवक्षया
त्रिगुणात्मकमित्युक्तं· तथा च गुणस्य गुणवत्त्वानुपपत्तेर्न मिथ्याज्ञानमज्ञानमित्यर्थः। ज्ञानाभावोऽज्ञानमिति

24

यस्याज्ञानं भ्रमस्तस्य भ्रांतः सम्यक् वेत्ति सः जडं न विद्यादेः घटत्वान्नानेः ज्ञानं जडाश्रयमिति ततश्च सत्यस्य वस्तुनो
मिथ्यावस्तुसंभेदाभावात् साध्यारोपसंबंधे कं भवति एतेन चिज्जडयोः परस्परतादात्म्याध्यासेऽप्ययमेव जगतस्तत्त्वं सा
दृश्यत्वस्य मिथ्यात्वादिति केषांचिन्मतं निरस्तं भ्रमकाले परिस्फुरदंशस्य मिथ्यात्वेऽप्यपरिस्फुरतोंऽशांतरस्य विद्य
मानत्वात् । तदुक्तमभियुक्तैः अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत्कथंचन परिस्फुरति भ्रमेषु रजतत्वशुक्तिश
कलत्वमरूपितित्वं चेदेकताप्रभृति कानुपलंभने नेति । किंचान्तःकरणविशिष्टाध्यस्तित्वमिदं स्यात्तद्दा भवति चो
द्यमिदं त्वदीयं सत्यानृतात्मकमिदं मिथुनं मिथ्याज्ञानस्य तत् किमिति शून्यकथाप्रसंग इति च तस्मात् सत्यमुक्तं
वस्तु सच्चिदानंदाद्वयं ब्रह्म तस्मिन् ज्ञानतत्कार्यमखिलजडसमूहस्यावस्तुनोऽध्यारोप इति अज्ञानं प्रसाधयति
अज्ञानेनेति । तथा ज्ञेयमन्तःकरणेभ्यो वैशेष्यद्योतनार्थः तमेव विशिष्टं दर्शयति सदसद्भ्यामित्यादिना । ज्ञानविरो
ध्यज्ञानमित्युक्ते ज्ञानप्रागभावे प्रसंगो व्युदस्यति भावरूपमिति उत्तरज्ञानविरोधिपूर्वज्ञानव्युदासाय सदस
द्भ्यामनिर्वचनीयमिति मिथ्याज्ञानव्युदासाय त्रिगुणात्मकमिति यद्वा ज्ञानविरोधित्वं ज्ञानापनोद्यत्वं तदेवा
ज्ञानत्वमित्यज्ञानलक्षणम् नच ब्रह्मात्मैकत्वज्ञानापनोद्यप्रपंचेऽतिव्याप्तिः तस्याज्ञानोपादानकत्वेनाज्ञा
नानतिरेकात् नाप्यज्ञानात्मसंबंधेऽतिव्याप्तिः असंगस्वभावस्य चिदात्मनो ज्ञानबंधस्याज्ञानाधीनत्वात्तस्याप्य
ज्ञानात्मत्वोपपत्तेः अतीतानागतयोर्लक्ष्यबाह्यभावसत्त्वेति न लक्षणस्यातिव्याप्तिः अव्याप्त्यसंभवयोस्तु शंकैव नास्ति ज्ञानेना
ज्ञानबाधस्य प्रसिद्धत्वात् नच पूर्वज्ञानेन ज्ञानप्रागभावे चातिव्याप्तिः पूर्वज्ञानापनोद्यत्वनियमाभावादिच्छादिवत्तेन रा

मानेतस्मिन्ननुपपत्तेर्न किंचिज्जानामीति बुद्धेर्ज्ञानविशेषाभावविषयत्वं कल्प्यत इति चेन्न अनेनैवानुपपत्त्याभावा
न्तरविषयत्वस्यैव कल्पनीयत्वात् नहि मां त्वामहं मामन्यं केचिदपि न जानामीत्यनुभवे किंचिद्विषयान्तरमवशि
ष्यते यज्ज्ञानाभावविषयत्वमस्य कल्प्येत यथास्मिन्भूतले न कोपि घटोस्तीति अस्य येन घटविशेषस्यानवशेषस्त
छतः नन्वप्रसिद्धभावान्तरकल्पनापेक्षया प्रसिद्धस्याभावस्यैव यथाकथंचित्प्रवृद्धे विषयत्वकल्पनमिति चेन्न
अत्यन्तमप्रसिद्धभावात् देवात्मशक्तिं स्वगुणैर्निगूढां मायां तु प्रकृतिं विद्यादिति च श्रुतिवाक्ययोर्गुणत्वेनोक्तस्य प्रमा
नजगदुपादानत्वेन च प्रसिद्धत्वात् तस्मान्नाभावो ज्ञानं किंतु भावान्तरमेवेति ननु भावत्वमप्यज्ञानस्यानुपपन्नमनादेस्त
स्य भावरूपत्वे चिदात्मवन्निवृत्तिप्रसंगादनिर्मोक्षापत्तेरिति मतमाह यत्किंचिदिति अयमर्थः नास्माभिरज्ञानस्य भा
वत्वं परमार्थसत्त्वाभिप्रायेणोच्यते किंत्वभाववैलक्षण्याभिप्रायेण न च भावाभावयोः परस्परप्रतिषेधरूपतया विधिनि
षेधयोरेकतराकारानुपपत्तिरिति वाच्यम् उभयोरपि मिथ्यात्वे परस्परप्रतिस्पर्धिनोर्निषेधे तदन्यस्यापि तदेव भावाभावा
न्यस्याज्ञानस्योपपत्तेः अथ तत्र प्रमाणेन तदीयाप्रसक्तिस्तिरस्कृत्य प्रतिपत्तिमतं तदेतद्व्याप्तिप्रमाणप्रतीतिविबाधान्यथानुप
पत्तिनिवृत्तिसंभवात् वस्तुतस्तु मायाया अस्माकमनिर्वचनीयत्वमाग्रहः ज्ञानस्य सर्वानुपपत्तेरलंकारत्वात् तदुक्तं अविद्याया अविद्यात्वमिद
मेव हि लक्षणं यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु स्यादिति इयं न्यायं निर्निरालंबा सर्वन्यायविरोधिनी सह तेन विद्यारंभ
तमायद्धि वाकरामिति इत्थं निर्वचनीयत्वमविद्यायामविद्यात्वे नानुद्भवति कथंचिद्धेतुमान्न स्याद्विद्यात्वे दुर्घटं भवेदिति ॥
तस्मात्सत्त्वेनासत्त्वेन सदसत्त्वेन साक्षाद्वा निरवयवोभयात्मकेन वा भिन्नाभिन्नोभयरूपत्वेन वा निर्वक्तुमशक्यत्वेनानिर्वचनी

+ अभावप्रतियोगि यत् ज्ञानं तत् किं साक्षि चैतन्यं स्यात् साक्षी चेत् तस्यादि कृतेस्तस्यापि ज्ञानत्वसिद्धेः १

मतं निरस्यति-भावरूपमिति अयमर्थः किं वान्तःकरणवृत्तिः विज्ञानेन वा ऋग्वेदं विजानातीति विज्ञानशब्देन बुद्धेः
श्रवणात् अथवा त्वगुक्तः तथात्वेन च ज्ञानस्य वैशेषिकतन्त्रे प्रसिद्धत्वात् तत्राद्ये ना भावप्रतियोगीतस्य निरस
त्वात् द्वितीये ज्ञानशब्दस्योपचारिकत्वेन तदभावस्य मुख्यतो ज्ञानत्वायोगात् येन वा पश्यतीत्यारभ्य प्रज्ञानेत्यत्र प्र
ज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोक इत्यन्तेन प्रज्ञाशब्दवाच्यप्रत्यक्चैतन्यव्याप्तस्यैव चक्षुरादिद्वारकबुद्धिपरिणाम
स्य संकीर्त्तनात् सांख्यपरमात्मसिद्धिस्यानौपचारिकत्वे स्वीक्रियमाणेऽपि न तस्याभावो ज्ञानं तस्याभावशब्देन तत्सुषु
दानबुद्धिस्वरूपावस्थानमात्रस्यैवाभिलप्यत्वात् अतः पक्षान्तरं परिशिष्यते तत्रेदं वक्तव्यं ज्ञानविशेषाभाव एवास्ता
ने ज्ञानसामान्याभावो वेति नाद्यो मूढोहं न किंचिज्ज्ञासीमित्यनुल्लिखितविषयविशेषस्याप्यज्ञानस्यानुभवात्
न च तत्रापि विषयविशेषपर्य्यवसायित्वं कल्प्यत इति वाच्यम् विनानुपपत्तिं सामान्यबुद्धेर्विशेषालंबनत्वे सा
मान्यबुद्धिविलोपप्रसंगात् तथा च घटवत्यपि भूतले घटसामान्यनिषेधप्रसंगः सुषुप्त्यभावप्रसंगश्च स्यात् तस्मा
ज्ज्ञानसामान्याभावोऽहमज्ञ इत्युल्लिख्यत इति वाच्यम् तत्र चाभावज्ञानस्य धर्मिप्रतियोगिज्ञानसापेक्षत्वात् वि
धर्मिणि ज्ञाने च प्रतियोगिनि विज्ञायमाने तस्मिन्नेवात्मनि कथं तत्राभावग्रहः कारणाभावात् षष्ठपक्षेऽप्ययमा प्रमाण ३
शङ्कनीयः न न्वनुपपत्तौ सत्यां सामान्यबुद्धेरपि विशेषालंबनत्वं कल्प्यते यथा घटवत्यपि भूतले घटो ना
स्तीति बुद्धेर्विवहितं तद्घटाभावविषयत्वं तद्वदत्रापि सामान्याभावस्य यत्किंचित्प्रतियोगिसत्वविरोधादात्मनि घितत्वाय

ज्ञानाभावग्रहः अभावप्रतियोगिनो ज्ञानस्य तत्र वर्त्तमानत्वात् तयोरविज्ञायमानयोरपि कथं

वे॰सा॰
टी॰
१६

दयः तथा सामान्यानुरक्तबुद्धिविषया विशेषाः सामान्यात्मका इति युक्तं सामान्यविशेषयोरत्यंतभेदे गवाश्ववत्सामान्यविशि
ष्टभावानुपपत्तेः भेदाभेदौ त्वेकस्मिन्न सामानाधिकरण्येन वस्तुनो वैरूप्यानुपपत्तेः अभेदपक्षे तु कथंचिद्भेदकल्पनया सामान्य
विशेषव्यवहारोपपत्तेः समुद्रतरंगादिवज्ज्वलनतरंगचंद्रादिवच्च तथा चात्मानस्यैकस्यैव सतः सामान्यविशेषभावेने
कानेकत्वव्यवहारः दृष्टांतेन विरुध्यत इति एतदेव दृष्टांतेरूपणादयितुमुपक्रमते· तथाहीत्यादिना· पुरश्चक्रे द्विपदः पुरश्चक्रे च
तुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति मंत्रद्वयानुसारेणात्मानं तत्तत्कार्या
वच्छिन्नं ज्ञानं तत्कार्यं प्रतिबिंबितो वा चिदात्मा जीवेश्वरभावं भजते इति मंत्रद्वयमुपदृश्य दृष्टांतद्वयोपादानमिति सर्वत्र वनत्

तथाहि यथा वृक्षाणां समष्टिमभिप्रायेण वनमित्येकत्वव्यपदेशः यथा वा जलानां समष्टिमभिप्रायेण जलाशय इति
तथा नानात्वेन प्रतिभासमानानां जीवगतानामज्ञानानां समष्टिमभिप्रायेण तदेकत्वव्यपदेशः ॥६७॥

तज्जलाशयजलकीर्त्तनाभिप्रायो द्रष्टव्यः नानात्वेनेत्यादेरयमर्थः अज्ञानं किं ब्रह्मनिष्ठमुत जीवनिष्ठं नाद्यो नित्यमुक्त
दिस्वभावविरोधात् न द्वितीयोऽन्योन्याश्रयात् तथाहि अज्ञानमित्युक्ते कस्य किंविषयमित्याश्रयविषयापेक्षायां नापेक्षिताश्रित
तैर्न निराश्रयमस्तीति प्रतिपन्नं ... जीवाश्रयत्वे जीवभावस्याप्यज्ञानाधीनत्वात् सिद्धे जीवभावे अज्ञानस्याश्रयत्वसिद्धिः
तत्सिद्धौ च जीवत्वसिद्धिरिति स्पष्टमेवान्योन्याश्रयः । नन्वनादित्वाद् ज्ञानजीवभावप्रवाहस्य बीजांकुरवन्नान्योन्याश्रय इति चेन्न
वत् क्रमभाव्यनेकबीजांकुरव्यक्तिवदनेकाज्ञानजीवव्यक्तीनां सत्त्वे प्रमाणाभावात् ननु सेना ... तदा संपन्नो भवति तर्हि ...
तमासीदित्यादिश्रुतिभ्यः सुषुप्तिप्रलययोर्जीवस्य परमात्मैकभावापत्तिश्रवणात्पुनः प्रबोधसर्गयोर्जीवभावापत्तेरवगम्यमानत्वा

16

= अहमज्ञ इत्यनुभवात् वृ॰ ७

इदानीं मया निरूपितमज्ञानमेव नास्ती
यमज्ञानं सवितरि दिवान्धपरिकल्पितान्धकारवत् यत्किंचिदिति वदन्ति तद्दूषयति सिद्धम्·
ति विवदमानं प्रति बोधयितुं तत्रानुभवश्रुती प्रमाणयति· अहमज्ञ इत्यादिना· अनुभवस्यास्याज्ञानाभावविषयत्वं प्रतिक्षिपन्नि
विकल्पकघटितप्रतियोगिकस्याज्ञानसामान्याभावस्यात्मनि प्रत्यक्षायोग्यत्वाच्च· नच भावरूपमप्यज्ञानमात्मनि ज्ञायमा
नेन गृहीतुं शक्यते तस्य ज्ञानविरोधित्वादिति वाच्यम्· स्वप्रकाशसाक्षिचैतन्येन तस्याविरोधाभावात् अन्तःकरणस्यैवतु
६रौ विधाऽहमज्ञ इत्यहंकारगर्भस्य चोल्लेखस्य साक्षिप्रकाशिताज्ञानविषये स्फुटतरव्यवहारमात्रत्वाच्च न काचिदनुपपत्तिरिति
भावः। देवस्य स्वयंप्रकाशस्यात्मनः शक्तिं शक्तिवत्परतन्त्रां स्वगुणैः फलादिभिः सत्त्वादिभिर्वा निगूढामालिंगितां तेधा

७ देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च· इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्रियते ॥१७॥
न योगानुगताश्च पश्यन्तीति संबंधः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः· नाहं प्रकाशः सर्वस्य योगमायासमावृत इ
त्यादिस्मृतेः प्रत्यगात्मचैतन्यस्य स्वरूपस्य प्रत्यक्त्वेन नित्यप्राप्तत्वेन स्वप्रकाशत्वेन चास्ति प्रकाशत इति व्यवहारप्रयोजककारणो
ऽस्ति नास्ति न प्रकाशत इति तद्विपरीतव्यवहारस्यात्मन्यावरणमन्तरेणानुपपत्तिः श्रोतव्य इत्यादिना आत्मयाथात्म्यज्ञाना
य श्रवणादिविधानानुपपत्तिश्च तस्मादर्थापत्तिद्वयं चकारेण समुच्चीयते॥ नन्वजामेकामिन्द्रो मायाभिरित्यादिश्रुतिभ्य
एकत्वानेकत्वयोरज्ञाने विप्रतिपत्तौ कः समाधिरिति वीक्षायामाह· इदमिति· व्यष्टिर्विशेषः समष्टिः सामान्यं व्यवह्रियते
श्रुत्यादिरिति शेषः॥ अयं भावः· यो यदनुरक्तबुद्धिविषयो नियतः स तदात्मको यथा मृदनुरक्तबुद्धिविषयो घटो मृदात्मको

वच्छेदनिर्वचनत्वात्· अनिर्वचनीयत्वे सति तत्त्वावभासप्रतिबन्धविपर्ययावभासहेतुत्वस्य लक्षणस्य तुल्यत्वात्· अविद्याभेदे चैक
ल्पनागौरवदोषात् एकाविद्यापक्षेप्यनंतशक्तिपरिकल्पनया जाग्रत्स्वप्नबन्धमोक्षरणनाभुजगादिव्यवहारव्यवस्था
पपत्तेः। न चात्रापि कल्पनागौरवं समानं धर्मिभेदकल्पनातो धर्मभेदकल्पने लाघवादित्यास्तां विस्तरः। अतश्चिन्मात्र
निष्ठमज्ञानं तस्य जीवब्रह्मविभागहेतुर्ब्रह्मणो जगत्कर्तृत्वादेर्जीवस्य कर्तृत्वादेश्च हेतुरित्यंगीकर्तव्यं॥ नच चिन्मात्रस्य
स्वप्रकाशत्वादज्ञानाश्रयत्वविरोधः। जीवपक्षेपि तुल्यत्वात्। अन्तःकरणपरिणामोपहितस्यैव चैतन्यस्याज्ञानविरोधित्वात्·
नच ज्ञानवदज्ञानस्याप्येकाश्रयविषयत्वानुपपत्तिः आवरकत्वेनापवरकस्थतमोवत्तदुपपत्तेः। तदुक्तमभियुक्तैः। आ
17 श्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः इति तस्मा
देकमज्ञानं चिन्मात्राश्रयविषयमिति स्थितं जीवावस्थायामेवाहमज्ञ इति स्फुटतरव्यवहारस्तदपेक्षया जीवगता
ज्ञानमित्युक्तमित्यनयैव दिशा जीवाश्रया ब्रह्मपदा ह्यविद्या तत्त्वविन्मतेति प्राचां वचनं योजनीयं· ननु नानात्वे
न प्रतिभासमानानां जीवानामेकाज्ञानोपाधिकत्वे एकमुक्तौ सर्वमुक्तिप्रसंग इति चेन्नायं दोषः। एकस्यैव जीव
त्वादितरेषां तद्दृष्टिविजृंभितत्वेन ततोऽनतिरेकात्· तर्हि कोऽसौ जीवो यद्दृष्टिविजृंभितं जीवान्तरमिति चेत् यः पश्यति
स एव अहन्तु संसारिणामात्मानमन्यांश्च सन्निधान् जीवान्पश्यामीति चेन्नाहं त्वमेव जीवस्त्वदविद्ययावयमन्ये
च जीवा बद्धा मुक्ताः सुखिनो दुःखिनः इत्येवं विचित्राः कल्पितास्त्वया ब्रह्मसाक्षात्कारमसंपादितः प्रतिभासन्तेऽस्वप्न

चेतनतद्विभागादेतैः संस्कारस्य स्यात् न स्यापिकल्प्यमानत्वात्कथं न बीजांकुरन्यायः सामान्य इति चेत् तत्किमिदानीं
सुषुप्त्यादिकाले जीवस्य जीवत्वं नास्तीति विवक्षितं हन्त तर्हि कृतनाशाकृताभ्यागमप्रसंगो मुक्तानामपि संसारित्वप्रसंगश्च
दुर्वारः स्यादविशेषात् किंच सुषुप्त्यादावज्ञानसद्भावे तस्य ब्रह्माश्रितत्वप्रसंगोऽसद्भावे सुषुप्तानां पुनरुत्थानप्रसंगः त
इह व्याघ्रो वा सिंहो वेत्यादिसत्संपत्तिवाक्यशेषासंगतिप्रसंगश्चेत्यसमंजसमेतत् । अथाज्ञानजीवयोः स्वरू
पेणैवानादित्वम् आश्रयाश्रयिभावस्य नित्यसिद्धत्वान्नान्योन्याश्रय इति मतं तदपि न । ब्रह्मण्यज्ञानाभावप्रसंगा
त् नायमिष्टप्रसंगः सोऽकामयत तदात्मानं स्वयमकुरुतेत्यादिश्रुतिभिर्ब्रह्मणो जगत्कारणे कामयितृत्वादेरज्ञानका
र्यस्य श्रूयमाणत्वात् नच शंखगतपीतिम्नः शंखे समारोपवज्जीवगताज्ञानविक्षेपस्य कामयितृत्वादेस्तद्विषये ब्रह्म
णि समारोपः कृतः कीर्त्यत इति वाच्यम् । तथा सति जीवानामेव जगत्सर्गस्थितिलयोपादानत्वात्सर्वं खल्विदं ब्रह्मे
त्यादिब्रह्मसामानाधिकरण्यं जगतः श्रूयमाणमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं च पीड्येत जीवस्य ब्रह्माभेदात्स
र्वमेवोपपद्यत इति न कश्चिद्दोष इति चेत् तर्हि जीवपक्षपातं परित्यज्य ब्रह्मण एव जगत्स्रष्टृत्वादिपक्षाश्रितं स्वी
कर्तव्यं विना तस्याज्ञानाश्रयत्वं कुतः स्यत्स्य न कामयितृत्वादौ सुले · तस्य च जीवाद्विभक्तस्याज्ञानाश्रयत्वेऽपि तन्ना
पि स्यादन्योन्याश्रयः । ननु ब्रह्मणोऽपि जगत्कारणत्वादिनिर्वाहकमज्ञानं मायाशब्दवाच्यमन्यदेव जीवगतनकर्तृ
त्वाद्यवभासहेतुभ्योऽज्ञानेभ्योऽविद्याशब्दवाच्येभ्य इति चेन्न · मायाऽविद्ययोः श्रुतिस्मृतिसूत्राभियुक्तवचनैरेकत्वस्य

मा.ता.
टी.
१०

हेतुमाह· सर्वेति सकलाज्ञानं समष्ट्यज्ञानं अवभासकत्वशक्तेर्विधारकत्वादेरप्युपलक्षणार्थः सर्वविशेषसंस्कार
वत्वादज्ञानस्य सत्कार्यविषयावरणाज्ञाव्याहृताद्यवस्थास्वपि समष्ट्यज्ञानस्य सर्वत्वमिति द्रष्टव्यम्· उक्तव्यपदेशिकां
श्रुतिमाह· यः सर्वज्ञ इति सर्वज्ञः सामान्यतः सर्वविद्विशेषत इति भेदः। आदिशब्दात् सदेव सोम्येदमग्र एष सेतुर्विधरणः एषत्र्याता
तथ्योस्यमतः महतः परमव्यक्तं यतो वा इमानि यः परः महेश्वरस्त्यादिश्रुत्यन्तरग्रहः उपहितस्य व्यपदेशभेदमुक्त्वोप

सकलाज्ञानावभासकत्वात्· यः सर्वज्ञः सर्वविदित्यादिश्रुतेः अस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमा
नंदप्रचुरत्वात्कोशवदाच्छादकत्वाज्ञानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अत एव स्थूलसूक्ष्मप्रपंचलयस्था
नमिति चोच्यते यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः यथा वा जलाशयस्य व्यष्ट्यभिप्रा
येण जलानीति तथा अज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः। इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः।

धेरपि तं सहेतुकमाह· अस्येयमिति अज्ञाननिर्देशार्थः। आनंदप्रचुरत्वमुपहितधर्मः आच्छादकत्वमज्ञानधर्मः तद्
भयोः विवेकाकारेणमज्ञानमानन्दमयकोश इत्यर्थः॥ सर्वे आकाशादय उपरमंते अस्मिन्निति सर्वोपरमः ज्ञानतो
द्भावात्सुषुप्तिर्महासुषुप्तिः प्रलय इति यावत्· यतः सर्वोपरमत्वमत एवेति योजना· स्थूलप्रपंचो विराट् सूक्ष्मप्रपंचो
हिरण्यगर्भः। एवं समष्ट्यज्ञानं साभासं सव्यपदेशं निरूप्य व्यष्ट्यज्ञानमपि सदृष्टांतं तथा निरूपयति· यथा वनस्ये
त्यादिना· एकत्वमनेकत्वव्यपदेशो ज्ञानस्येति तदाह· इंद्र इति· इन्द्रः परमेश्वरः प्रकरणात् मायाभिर्मायावि ... भिर्विविधैस्तु ...
द्रियांतःकरणेषु प्रतिबिंबितः पुरुरूपो बहुरूपः प्रतीयते प्रकाशत इति श्रुत्यर्थः। अविद्या एकोजालवानीशत ईशनीभिरित्याश्रु

28

इ्वाप्रबोधं जातेनु प्रमोत्मपारोगकारे सर्वमेवत्वद्दृष्टिविजृंभितं त्वयासदमोत्सिध्यतेत्व सुप्तावित्येतिरयोस्तु पुनर्विशेषः सुषुप्तावस्थायां सर्वकार्यसंस्कारोपरंजितं पुनर्व्यवहारप्रवर्त्तकं मुक्तौतु तस्य ज्ञानेनबाधितत्वान्न व्यवहारभावइस त्वप्रसंगागतप्रपंचेन । वनवनयोर्जलाशयोर्वा सामान्यविशेषभावोनास्तीति यद्यपिदृष्टांतिकेन वैषम्यं तथा पिसमुदायसमुदायिनोरेकत्वेदृष्टांतदार्ष्टांतिकयोः साम्यात्सर्वांशेन च साम्यस्याविवक्षितत्वान्न कश्चिद्दोष इतिमयितव्यं अज्ञानेकत्वव्यपदेशिनीं श्रुतिं पठति । अजामेकामिति आदिपदान्मायांतु प्रकृतिंविद्यात् । तदस्यवि

अजामेकामित्यादिश्रुतेः स्वयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वनियंतृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कारणमीश्वर इति चव्यपदिश्यते ॥३७॥

र्णवितं तो अक्षरात् परतः परः तद्देतदव्याकृतं तम आसीत्तमसा गूढमित्याद्येकवचनांतश्रुत्यंतरप्र सः एकस्यैवाज्ञानस्य समष्टिव्यष्टिभेदभिन्नं परिकल्प्य समष्ट्यज्ञानोपधानविबंधने चैतन्यव्यवहारं वक्तुं समष्टि विशिनष्टि । इयमिति उत्कृष्टोपाध्यंतराननुरक्तत्वादुत्कृष्टति एतत्तादात्म्यकल्पचैतन्यस्योपाधितया विभुरेजस्तमोभ्या मनभिभूतं सत्वं प्रधानं यस्याः सानत्वादित्येवं समष्टिरित्यर्थः समष्ट्यज्ञानोपहितचैतन्यस्य व्यपदेशभेदं दर्शयति । एतदिति परमार्थतो जगन्मायाविनेतस्य स्याभासिकसंबंधसंबद्धाज्ञानद्वारा सर्वावभासकत्वेन सर्वज्ञत्वं विद्यापरिधारकं सत्तारूपत्वेन सर्वजीवप्रवर्तकत्वेन चेत्याद्युक्तं सर्वज्ञत्वादिगुणकस्य सदव्यक्तमंतर्यामीश्वर इत्यादिव्यपदेशो भवतीत्यर्थः । उक्तेर्थे

मै॰ मा॰ टी॰
११

कर्तृत्वं सिद्धवत्कृत्य तयोस्तदवस्थापन्नं भोक्तृं दर्शयति तदानीमिति तयोरवस्थयोर्जीवावच्छेदकस्य प्रकृष्टज्ञानस्य केना
पि रूपेणास्थितत्वादेतावित्यादिश्रुतिवचनोपपत्तेः न सर्वात्मनैक्ये पुनरुत्थानानुपपत्तेः आनंदस्वरूपानंदमनु
भवतः आनंदशब्दोऽज्ञानतत्साक्षिणोरप्युपलक्षणपरः तदानीमखंडात्मस्वरूपचैतन्येनैवानंदाद्यनुभवे
भ्युपगमाने स्वरूपस्य नित्यत्वात्तज्जन्यसंस्काराभावेनावस्थान्तरे स्मरणानुपपत्तेः परामर्शानुपपत्तेस्तदनुकू
लमुपाधिविशेषं कल्पयति अज्ञानवृत्तिभिरिति अन्तःकरणादेरप्यज्ञानकार्यत्वेन तदात्मकत्वात्ते

तदानीमेतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिः सूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभ
वतः आनंदभुक् चेतोमुखः प्राज्ञ इत्यादिश्रुतेः सुखमहमस्वाप्सं न किंचिदवेदिषमिति उत्थितस्य परा
मर्शोपपत्तेश्च

२१

दभिप्रायोऽज्ञानशब्दो माभूदिति विशिनष्टि सूक्ष्माभिरिति दुर्लक्ष्यत्वमात्रं सूक्ष्मत्वं तासां वृत्तीनां जडत्वात्क
थं ताभिरानंदाद्यनुभव इत्यत आह चैतन्येति चैतन्यव्याप्ताभिरित्यर्थः तथा च वृत्तिविनाशात्तद्विशिष्टचैत
न्यस्यापि विनाशात्संस्कारजन्यं स्मरणमवस्थान्तरे संभवतीति भावः तत्र प्रमाणमाह आनंदभुगिति चेतोमुखश्चैतन्यदी
प्ताज्ञानवृत्तिप्रधानः आदित्योदयात्प्राक्काले सकले विलीने तमोभिभूतः स्वरूपमेतीत्यादिश्रुत्यन्तरमाह तत्रैवानुभ
वमपि प्रमाणयति सुखमिति न चायं सुखपरामर्शो दुःखाभावविषयस्तस्य तत्रानुभूतत्वात् तदनुभवसामग्र्याश्चानिरू

एकस्मिन्नज्ञाने व्यष्टिसमष्टिशब्दप्रयोगे निमित्तमाह· अत्रेति· अज्ञानं समष्ट्यर्थः व्यस्तव्यापित्वेन कार्योपाधिजीवव्यापि
त्वाद्व्यासेन व्यष्टि... व्यपदेशः समस्तव्यापित्वेन कारणोपाधि सर्वज्ञाऽविभक्तसर्वव्यापित्वेन समष्टिता व्यपदेशइ
त्यर्थः। निकृष्टोपाधितयेति ज्ञानप्रतिबंधकारणवान् जीवो निकृष्टस्तस्योपाधितयेत्यर्थः। मलिनं रजस्तमोभ्यामभि
भूतं सत्वं प्रधानं यस्याः सा तथा रजस्तमसोः स्वातंत्र्येण प्रतिबिंबोद्ग्राहकत्वायोगादिति भावः॥ एतदुपहितं व्यष्ट्यज्ञानोपहितं
एकाज्ञानावभासकत्वादज्ञानैकदेशावभासकत्वादिति यावत्। व्यष्ट्यज्ञानोपहितस्य प्राज्ञशब्दवाच्यत्वे कारणमाह· अस्ये
ति· अस्य जीवस्यास्य स्वोपाधितया रजस्तमोभ्यामभिभूतसत्वप्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुनाऽतिप्रकाशकत्वाभावा

अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्र
धाना एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते. एकाज्ञानावभासकत्वात्· अस्य प्राज्ञत्वमस्प
ष्टोपाधितयानतिप्रकाशकत्वात्· अस्यापीयमहंकारादिकारणत्वात् कारणशरीरमानन्दप्रचुरत्वादेव हेतो
रानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिः अतएव स्थूल [illegible] सूक्ष्मप्रपंचलयस्थानमिति चोच्यते॥ ॥

प्राज्ञशब्दवाच्यत्वमित्यर्थः। प्रायेणाज्ञः प्राज्ञः इत्युक्तं भवति एवं तदुपहितस्य व्यपदेशमुक्त्वोपाधेरप्याह· अस्यापीति· अ
पिशब्द ईश्वरोपाधिदृष्टान्तार्थः अहंकारादेः सुषुप्त्याद्यवस्थायां संस्कारावशेषेण स्थितस्य कारणत्वादित्यर्थः। आनंदप्रचुर
त्वादेवेत्युकारः कोशवदाच्छादकत्वादिति हेत्वन्तरसमुच्चयार्थः एवं आनन्दप्रचुरत्वाद्धेतोरेवेति भिन्नक्रमः; त
स्मिन्नपि कोशवदाच्छादकत्वादिरनुषंजनीयः प्रवेशश्चोज्ञानत्वप्रविशेषः शेषमतिरोहितार्थम्॥ सता सोम्य तदा
संपन्नो भवतीत्यादिश्रुतेः सुषुप्तौ प्राज्ञस्येश्वरसंपन्नावगमात्प्राज्ञेश्वरयोरेकत्वं तदवस्थयोरपि अव्याकृतसुषुप्त्योरे

मीं तत्कार्यभूताध्यारोपं क्रमेण निरूपयिष्यंस्तदुपयोगित्वेनाज्ञानगतं सामर्थ्यं तावन्निरूपयति॰ अस्याज्ञानस्येति॰ तत्रावरणशक्तिं सदृष्टान्तामुपपादयति॰ आवरणेति॰ यद्यप्यज्ञानस्य मूर्तत्वामूर्तत्वाभ्यामनिर्वाच्यत्वान्न परिच्छिन्नत्वं तथापि परिच्छेद्यापेक्षयाल्पत्वमात्रं विवक्षितमिति दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यम्॰ बुद्धिपिधायकतये

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्॥ आवरणशक्तिस्तावत्॰ अल्पोऽपि मेघोऽनेकयोजनमायतनमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमपि यथाशक्त्या आत्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयत्येव तादृशं सामर्थ्यं॰ तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा॥१॥ अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंभावनापि भवति॰ यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसंभावना॥ विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमज्ञानमपि स्वावृतात्मनि यथाशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्॥ ॥॥

यत्र बुद्धिशब्देन तदनुरक्तं चैतन्यं लक्ष्यते बुद्धेरज्ञानकार्यत्वेन तदावृतत्वानुपपत्तेः [illegible] लकार्य [illegible] मित्याह॰ तदुक्तमित्यादिना॰ उक्तमावरणशक्तिं तत्कार्यद्वारा बुद्धिमारोहयति॰ अनयेति॰ सृष्टिबावनस्वरूपबुद्धिप्रावरणेनैव विपरीतार्थसंभावना भवतीत्यत्र दृष्टान्तमाह॰ यथा स्वाज्ञानेनेति। विक्षेपशक्तिं सदृष्टान्तामाह। विक्षेपेति॥

पवित्रमशक्यत्वात् विरुद्धं तच्चैतन्यं ईश्वरस्य परमात्मशब्दाधिकारात् उक्तोपाध्योस्तदुपहितयोश्च प्राक् सिद्धत्वं तदभेदं
विशदयति· अनयोरिति· प्राज्ञेश्वरयोर्भेदे श्रुतिं प्रमाणयति· एष सर्वेश्वर इति आदिपदादेष य एष संप्रसादोऽस्मा
च्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुत्यंतरग्रहः। प्राज्ञेश्वरात्मकस्य चैतन्यस्यापि
तत्त्वेऽनुपहितचैतन्यमन्यदेवेत्यभिदुक्ते· किं तदित्यपेक्षायां तत्स्वरूपं संज्ञेऽप्यदर्शयति· वनेति· आधारश्चासावनुपहि
तश्चासावाकाशश्च स तथा वदितियावत् यद्यप्याकाशस्य वनाश्रयत्वं जलाशयाश्रयत्वं वा नास्ति तदनारंभकत्वा

अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरेव वाऽभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपि व
नवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिव वाऽभेदः। एष सर्वेश्वर इत्यादिश्रुतेः वन
तदवच्छिन्नाकाशयोर्जलाशयतद्गतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचै
तन्ययोराधारभूतं यदनुपहितचैतन्यं तत्तुरीयमित्युच्यते· शिवमद्वैतं चतुर्थं मन्यन्त इत्यादिश्रुतेः। इदमेव तुरीयं
शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते·

त् तथाप्यवकाशमंतरेण तयोः स्थितेरनुपपत्तेस्तदाधारत्ववचनमिति द्रष्टव्यं अस्य चैतन्यस्य तुरीयत्वं वक्ष्य
माणं किं स्वाद्यपेक्षयेति द्रष्टव्यम् तत्र प्रमाणमाह शिवमिति आदिपदात् त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च य
द्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव इत्यादिश्रुत्यंतरग्रहः॥ अध्यारोपेण व्यासमर्के चित्तनयाप्रकरणं
र्वः। विस्मरणं मा भूदिति प्रसंगात्तमाह॥ इदमेवेति· एवमवस्थाभिमानिसहितेनाज्ञानेन सविभागेन समग्रप्रपंचं निरूप्येदा

वे.सा.
टी.
२१

ति॰ तमःप्रधानेति॰ तमसः प्राधान्यनिर्देशादज्ञः सत्त्वयोरपि तत्र मात्रयास्तित्वं सूचितम् उक्तभूतसृष्टिक्रमे प्रमाणमाह॰ तस्मादि
ति॰ नन्वाकाशं नोत्पद्यते निरवयवद्रव्यत्वादात्मवदिति चेन्न उदाहृतश्रुतिबाधितविषयत्वेनानुमानानुत्थानात्
प्रत्यनुमानविरोधाच्च । तथाहि । आकाशमुत्पद्यते महत्त्वे सति भूतत्वान्महापृथिव्यादिवत् । न चाश्रयासिद्धो हेतुः
आश्रयस्याकाशस्योभयवादिसिद्धत्वात् । न च धर्मिग्राहकप्रमाणबाधानिबन्धनाप्याश्रयासिद्धता हेतोः धर्मिग्राह
कप्रमाणेन शब्दाश्रयत्वाकाशस्य धर्मिमात्रसिद्धावपि तदुत्पत्तिनित्यत्वादेरनासिद्धेः । न च स्वरूपासिद्धः भूतत्वम

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापो
ऽद्भ्यः पृथिवी चोत्पद्यते तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः ॥

21

हत्त्वयोः पक्षे संप्रतिपन्नेः न च व्याप्यत्वासिद्धो निरुपाधिकत्वात् न च मूर्त्तत्वसावयवत्वरूपवत्त्वादेरुपाधित्वं शंक्यं गु
णकर्मणोः साध्याव्याप्तेः भूतत्वद्रव्यत्वसामान्ययोर्नित्यत्वादेश्च [illegible] साधनव्यापकत्वात् । अथ द्रव्यत्वव्यतिरि
क्तावान्तरजातिमत्त्वमुपाधिरिति चेन्न॰ प्रध्वंसे साध्याव्याप्तेः तस्योत्पत्तिमत्त्वेपि जात्याश्रयत्वाभावात्॰ न च साध्य
स्योत्पत्तिमत्त्वस्य भावधर्मिकत्वान्न प्रध्वंसे प्रसक्तिरिति वाच्यम् । उत्पत्तिमात्रस्यैवाकाशे साध्यत्वात्॰ अन्यथा विप्रति
पन्नविषयाणां द्रव्यत्वादीनां धर्मिगतानां साध्यताप्रसंगादित्यनुमानानां कौशलमापद्येत॰ न चान्यः कश्चिदुपाधिरुत्प्रे
क्ष्यते अविभुत्वं त्वाकाशेपि वेदान्तिनः समानं न्यायनये तदसिद्धात् येनावच्छिन्ने स्वचरितविगमस्तादृशावासापेक्षतयाका

[illegible]कार्यान्तरसमर्थ इति भावः· तदुक्तं विक्षेपेति· आवरणविक्षेपशक्तिद्वयविशिष्टमज्ञानं कूटस्थाभासं गृह्णच्चैतन्यात्मनो ज
गत्कारणत्वोपाधिरिति भावः· तदुक्तमभियुक्तैः आच्छाद्य विक्षिपति संस्फुरदात्मरूपं जीवेश्वरत्वजगताकृतिभिर्मृषै
व अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमात्रविषयाश्रयताबलेनेति· नन्वेवंविधाज्ञानोपाधिकेश्वर
चैतन्यस्य यत्कारणत्वं तन्निमित्तत्वं स्यादुपादानं वा उभयं वेति जिज्ञासायामाह· शक्तिद्वयवदिति· स्वप्रधानत
या कूटस्थचैतन्यस्वरूपावभासितया स्वोपाधिप्रधानतया उपाध्युपरक्तसत्तास्फूर्तिरूपतयेति भेदः।।

तदुक्तं विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति स्मृतेः· शक्तिद्वयवदज्ञानोपहितचैतन्यं स्वप्रधानतया निमित्तं स्वो
पाधिप्रधानतयोपादानं च भवति· यथा लूतातन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरोपाधिप्रधानतयोपादानं च
भवति।।

एकस्योभयविधकारणत्वे दृष्टान्तमाह।। यथेति।। लूता ऊर्णनाभिः तन्तुरेव कार्यं तन्तुकार्यं यथा लूता तं
तु निर्मातीति प्रसिद्धकार्यं स्वतन्तुकार्यं प्रति सहायमनपेक्ष्यैव तन्तूनां तानवितानात्मकं चेतनकार्यं जालरूपं
सृजति।। एवमीश्वरः आकाशाद्येकएवाद्वितीयोऽसहाय एव स्वमायाशक्त्यावेशमात्रेण लिङ्गादिब्रह्माण्डान्तं ज
गत्सृजेदिति भावः।। तथा च श्रुतिः यत्तदद्रेश्यमग्राह्यमित्युपक्रम्य यथोर्णनाभिः सृजते गृह्णते च यथा पृथि
व्यामोषधयः संभवन्ति· यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति।। व्यासोऽपि
प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति· तदेवं चैतन्यस्य जगत्कारणत्वं प्रपञ्च्य ततः कार्यं तस्मिन्कल्पितं

वे.सा.
टी.
२२

शास्त्रैकप्रमाणगम्यः। सिद्धेऽपि तेन धर्मिस्वरूपेणानित्यत्वादेरसिद्धेः नच परमाणूनामपि कार्यत्वे कारणान्तरस्याना
न्तकिमपि मूलकारणं जगतः स्यादिति वाच्यम्। ब्रह्मण एव जगन्मूलकारणस्य श्रुतिस्मृतीतिहासपुराणप्रसिद्धत्वा
त्। तथाहि क्षित्यादिकं सानुमन्तृमत् अचेतनभावत्वात् पटवत् नचास्माकमविद्यायां व्यभिचारस्तस्याभावाभावविलक्ष
णत्वाभ्युपगमात् अन्येऽपि हेत्वाभासाः पूर्ववदुद्धरणीयाः नच सामान्यविशेषसमवायेषु व्यभिचारः तत्र सा
मान्यस्याविचार्यमाणे व्यक्तिस्वरूपानतिरेकात् अचेतनत्वहेतोस्तत्राप्रवृत्तेः तथाहि विशेषास्तावत्सामान्ये कल्पि
ताः इति त्वविद्यावादे निरूपितं तथा च द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररूपाणां सत्तायामन्तर्भावः स
त्तायाश्च स्फुरणविरहितायाः क्वाप्यनुपलम्भात् स्फुरणमात्रत्वे पुनः स्फुरणं च ब्रह्मैव सदेव सोम्येदं सत्यं ज्ञानमनं
तमित्यादिश्रुतेः। ब्रह्मत्वपरादात्मनो ब्रह्मवेदत्वादेः परब्रह्मस्वरूपातिरिक्तत्वेन ब्राह्मण्यादि जातिविजातौ
निदर्शनान्न तस्मान्न सामान्ये व्यभिचारः विशेषसमवायौ तु खपुष्पकल्पौ अनयोर्यथा खपुष्पकल्पत्वं तथा चिदान
न्दलहरीटीकायां प्रपञ्चितमस्माभिरिति नेह प्रपञ्च्यते। अत एव श्रुतयश्च भवन्ति प्रत्यनुमानबाधिकाः अणोरणीयानिति हि परमा
णोरप्यणीयः परमकारणं ब्रह्म दर्शयित्वा यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिदिति तेन श्री
युक्तानि तदतिरिक्तमणु महद्वा विशेषेण प्रतिषेधति। असतोऽधि मनोऽसृजत एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे
ति च तैत्तिरीयाथर्वणश्रुती मनसः उत्पत्तिं स्पष्टमाचक्षाते तथा हि कालकालो गुणी सर्वविद्यः सर्वे निमेषा जज्ञिरे इ
ति च श्वेताश्वतरतैत्तिरीयश्रुती कालस्यापि कार्यतामावेदयतः पुरुष एवेदं सर्वमित्युपक्रम्य दिशः श्रोत्रादिति पुरुष

२२

आकाशेऽस्मत्प्रत्यक्षानुमानं प्रतीतमिति कश्चिदमुं तं भात

शस्य न्यूनपरिमाणत्वं श्रवणेन अतो न तत्प्रतिसंस्योपाधित्वं नापि विरुद्धः साध्यविपर्ययव्याप्तेः नापि साधारणानैकान्तिको
विपक्षाप्रवेशात् नाप्यसाधारणः सपक्षगामित्वात् नापि कालातीतो बाधकप्रमाणानिरूपणात् नचोक्तानुमानं बा
धकमिति वाच्यम् तस्य नरशिरःकपालशुद्धतानुमानवदागमबाधितविषयत्वस्योक्तत्वात् न च श्रुतेराकाशा
भिव्यक्तिमात्रार्थत्वान्नोत्पत्त्यर्थतेति वाच्यम् सिद्धे चानुमानस्याबाधितविषयत्वेन प्रामाण्ये श्रुतेरन्यार्थत्वसि
द्धिस्तत्सिद्धावितरसिद्धिरितीतरेतराश्रयात् किंच तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यस्मिन्नकृत्स्नं तत्र
भूतत्वादाकाशोत्पत्तावनुमानो गौणः स एव वाय्वादावनुषज्यमानो मुख्य इति महदिदं व्याख्यानकौशलं
तार्किकशिरोमणेः नापि विरुद्धानैकान्तिकता विपक्षव्यावृत्तेः स्फुटत्वात् नापि प्रकरणसमानतात्वदनुमानस्य दुर्ब
लत्वेनोभयोः समानबलत्वाभावात् निरवयवद्रव्यत्वस्य विनश्यदवस्थापन्ने घटे व्यभिचारादवयववत्त्वात्तत्ताभा
वाधिकरणत्वे निरवयवशब्देन विवक्षितमिति चेन्न अवयवशब्देन प्रदेशविवक्षायां सर्वस्याप्यवयविप्रदेशस्या
वयवत्वेनोपक्षीणत्वादवयवाभावप्रसंगात् आश्रयविवक्षायामन्यतरासिद्धो हेतुः स्यात् आकाशाश्रयस्याव
त्मनोभयेष्टत्वात् तस्मात्त्वदनुमानं सप्रतिपक्षः नापि प्रतिपक्षान्तरमस्तीत्युच्यते तस्मादनुमानेनाप्याकाशोत्पत्तेः
संभावितत्वात् शुष्कतर्कैः श्रुतमनादृत्याक्षतमुक्तमेवाकाशजन्मेतरजन्मवत् श्रुत्यैवाभ्युपगम्य चेदं परमाणु
नामनुत्पत्तिमसं महत्त्वे सतीति हेतुर्विशेषितः तदनभ्युपगमे तु भूतत्वादित्येव हेतुः तथाहि चतुर्विधाः परमाणु
वः उत्पद्यन्ते मूर्तत्वाद्भूतत्वाद्वा घटादिवत् न च मनसि मूर्तत्वहेतोरनैकान्तिकता तस्यापि पक्षतुल्यत्वात् न च धर्मि

द्विकार्यस्यान्तरगपूर्वलवदित्यलंप्रपंचेन· प्रकृतमनुसरामः तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्य
माकाशादिकारणमित्युक्तं तत्कथमवगम्यते भूतकारणाज्ञाने तमःप्राधान्यमिति तत्राह· तेषु चेति· जडत्वा
धिक्यदर्शनादित्यत्राधिक्यशब्दं प्रयुञ्जानः सत्तास्फूर्तिप्रदत्वेन कार्येषु चैतन्यस्यापि ईषदनुवृत्तिं सूचयति
तथा चाहुस्तत्वदर्शिनः अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति
[illegible]ख्याह यदस्ति यद्भाति तदात्मरूपं नान्यत्ततो भाति न चान्यदस्ति स्वभावसंवित्प्रतिभाति केवला ग्राह्यंगले

तेषु च आकाशादिषु जाड्याधिक्यदर्शनात् तमःप्राधान्यं तत्कारणस्य तदानीं सत्वरजस्तमांसि गु ण
कारणगुणक्रमेण तेष्वाकाशादिषूत्पद्यंते एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि च

23

तेति मध्यविकल्पइति उत्पद्यमानेष्वाकाशादिषु वक्ष्यमाणकार्यानुरूपं गुणत्रयमुपलंभयति· तदानीमिति
कारणस्याज्ञानस्य ये गुणाः सत्वादयस्तेषां प्रक्रमेण तानतिगुणानारभ्य यथाकार्ये क्रमेण सत्वादिगुणाः स
दैव कार्येष्वप्युत्पद्यन्त इत्यर्थः । नन्वज्ञानात्पंचतन्मात्राणि क्रमेण जायन्त इति हि स्मृतीतिहासपुराणेषु प्रसिद्धि
स्तत्कथमाकाशादीनि हि समुत्पद्यन्त इति तत्राह· एतान्येवेति· एतान्येवाकाशादीनि सूक्ष्मभूतानि [illegible] तन्मात्राशब्दा
दिनाचन्मात्रैकस्वभावानि अपंचीकृतानि परस्परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः । तदेवं भूता
न्यारोप्य श्रोतॄनुपक्रम्य इदानीं भौतिकाध्यारोपं प्रतिजानीते· एतेभ्य इति प्रतिज्ञाते करणाविद्वणीति सूक्ष्मशरीराणीति

सृष्टात्मिकाध्यस्तिः इत्थं पुरुषविकासत्वं संचयति · अनंतस्य प्राच्यादिव्यपदेशस्यादित्यगत्युपाधिनानभस्येव कल्पितत्वान्नाकाशा
तिरिक्ता दिगस्तीति गमयितव्यं । न च ब्रह्मणोप्युत्पद्यते कारणत्वादाकाशवदिति वाच्यम् · अजो नित्य इत्यादिश्रुतिविरोधात् ·
असंभवस्य सतोनुपपत्तेरिति न्यायविरोधाच्च · एतेन जगत उत्पत्तिप्राक्काले ब्रह्मातिरिक्तं वस्तु नास्तीति दर्शितं · अविद्या
याश्चात्मशक्तित्वेन गतः पार्थगर्थ्या योगाज्जीवानां च तदा परमात्मनि संपन्नत्वान्न दृष्टानां च तदुपाध्यन्तःकरणानि
ष्टानां तत्संस्कारविशेषाविद्यामात्रत्वेन पृथक्सत्त्वाभावात् · विस्तृतं चैतदनाद्यविद्याधिकरणादाविति विश्र
म्यते · आकाशाद्वायुर्वायोरग्निरित्यादेः आकाशादिभावमापन्नादविद्यासहाया ब्रह्मण एव वाय्वादीनामुत्पत्तिरिति
द्रष्टव्यं तत्तेजो असृजत तत्तेज ऐक्षत इत्यादिश्रुत्यन्तरे तेजःप्रभृतेरपीक्षणपूर्वकमवादिसृष्टत्वश्रवणात् · अचे
तनस्य चेक्षणानुपपत्तेः । न्यायोपि तदभिधानादेव तल्लिंगात्स इति समवार्थं निर्णेष्यति · एतेन प्रधानाणवादिवा
दा निरस्ता वेदितव्याः तेषां श्रुतिविरुद्धत्वान्न्यायविरुद्धत्वाच्च · नह्यचेतनं चेतनानधिष्ठितं किंचित्कुर्वदुपप
द्यते रथशकटादावदर्शनात् · अतो न प्रधानवादः आश्रयणीयः तथा परमाणुवादेपि अणोर्द्वयोः संयोगस्या
काप्यवच्छिन्नतयोः स्वावयवतापत्तेरनित्यत्वप्रसंगः न संयोगस्याव्याप्यवृत्तित्वेन निरवयवयोरणोरेकस्मिन्नित
रस्यासंमितत्वात्प्रथिमानुपपत्तिः तथा च तत्कार्यस्य द्व्यणुकस्यापि पारिमण्डल्यत्वप्रसंगः किंच द्व्यणुकारंभसमये प
रमाणुकर्थं निष्क्रियेतेन वा · अदृष्टेः निमित्तत्वादृष्टापत्तिर्भस्तिं उपचितं द्वितीयपरमाणुसमूह एव द्व्यणुको

के.सा.
टी.
२८

रथ्यंतःकरणवृत्तित्वेन तदाश्रितत्वेन च तदभेदान्न पार्थगर्थ्येन विविक्ता अन्तःपृथग्वृत्त्यर्थकिके न नविरोधः तथाप्यहंकारेपि भूतसूक्ष्माणि त
त्कार्येभ्यः पृथक्कृत्यान्तःकरणमात्रायोगात् वृत्तिवृत्तिमतोरभेदं गृहीत्वा सप्तदशत्वं लिङ्गस्योक्तं तथा च सप्तदश प्रजापतिरिति श्रुतेः
प्रजापतेर्हिरण्यगर्भस्य सप्तदशात्वावगमात् सप्तदशावयवमेव लिंगशरीरं मुख्यमेवैपमिति तद्गुणमभियुक्तैः मुख्यं तु सप्तदशकं प्रथितं
हि लिंगमिति । ज्ञानसाधनानीन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि तेषां शब्दस्पर्शरूपरसगंधग्राहकेन्द्रियत्वानि सत्वैकं यथाक्रममुल
ल्लेणानि सूक्ष्मेन्द्रियाणि एषां हं कारिकाणीति सात्विकत्वात् सत्वान्वितानि कुर्वन्ति भौतिकत्वं कथयति । एतानीति । कारणगुणेनोत्पन्नत्वात् त्रिगुणात्मकम्

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि एतानि पुनराकाशादीनां सात्विकांशेभ्यो समस्तेभ्यः पृथक्
क्रमेणोत्पद्यन्ते । बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः मनो नाम संकल्पविकल्पात्मकांतःकरणवृ
त्तिः ॥ अनयोरेव चित्ताहंकारयोरंतर्भावः एते पुनराकाशादिगतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यंते ॥१॥

२४ ज्ञानानां सत्वगुणावच्छिन्नेभ्यो अंशेभ्यो गुणोद्रेककृतभागेभ्यः श्रोत्रादीनि जातानीत्यर्थः ॥ बुद्धिमनसी लक्षयति । बुद्धिर्नाम
ति । निश्चयो अध्यवसायः इदमित्थमेवेति विषयपरिच्छेदः संकल्पः इदं नीलमिदं पीतमिति विषयविवेचनं विकल्पस्तद्विपर्य
य इति भेदः । नन्वन्तःकरणस्य चतुष्टयत्वप्रसिद्धेः कथमिदं द्वयमेवगृहीतमित्यत आह ॥ अनयोरेवेति । अनुसंधानात्मि
कान्तःकरणवृत्तिश्चित्तं अभिमानात्मिकान्तःकरणवृत्तिरहंकारः चित्तस्य बुद्धावंतर्भावः विषयपरिच्छित्तिरूपत्वा
विशेषात् अहंकारस्य मनस्यन्तर्भावस्तस्यापि संकल्पात्मकत्वाविशेषात् एवं स्वरूपाभेदेपि विषयभेदात्कचिच्चित्ताहंका
रयोर्बुद्धिमनोभ्यां पृथङ्निर्देशः बुद्धेरूपपूर्वे विषयाश्चित्तस्य पूर्वानुभूतः तथा मनसो ग्राह्यः अभ्यंतरश्चाहंकारस्यैव विषयो यथायोगं २८

लिंग्यते ज्ञाप्यते प्रत्यगात्मसद्भाव एभिरिति लिंगानि तानि च तानि शरीराणि च शरीरे प्रविष्टत्वाच्छरीरसाधनत्वाद्वा
धर्म्मादिस्वरेतानि लिंगशरीराणीत्यर्थः तथा च प्रयोगः विमतानीन्द्रियाणि प्राणश्च स्वातिरिक्तस्वानुगतचेतनया
धिष्ठानपूर्वकप्रवृत्तयः अचेतनत्वाद्रथादिवदिति श्रुतिश्च भवति प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं
मनसो ये मनो विदुरिति यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमित्यादिका च के पुनः सप्तदशावयवा इति ताना
ह- अप्रयंगानिति. ननु कथं लिंगशरीरं सप्तदशावयवमिति निश्चीयते यावतायुर्वेदके लिंगमाचष्टे सुरेश्वरा
चार्याः पंचीकरणवार्तिके ज्ञानेन्द्रियपंचकं पंचैव कर्मेन्द्रियाणि च मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं प्राणापानस्तथा

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते. सूक्ष्मशरीराण्यपि सप्तदशावयवकानि लिंगश
रीराणि. अवयवास्तु ज्ञानेन्द्रियपंचकं बुद्धिमनसी कर्मेन्द्रियपंचकं वायुपंचकं चेति ॥१॥

व्यान उदानाख्यस्तथैव च समानश्चेति पंचैताः कीर्तिताः प्राणवृत्तयः एवं वाग्मधीरियश्च भूतसूक्ष्माणि पंच च अविद्याका
मकर्माणि लिंगं पुर्यष्टकं विदुरिति अन्यत्र पुनरस्माह वार्तिके भूतसूक्ष्मपंचकमेकं ज्ञानेन्द्रियपंचकं द्वयं चतुर्थं क्रिकमे
कर्मतः करणपंचकं त्रिकमेकः प्राणश्चेति सप्तदशावयवा इति अतः कथं निर्णय इति. उच्यते नैते पक्षा एकांते विकल्पो
पपद्यते वस्तुनि तदयोगात्. नापि समुच्चयस्तत्र प्रमाणाभावात्. किं तु लिंगस्य सप्तदशकस्यैव संक्षेपविस्तरभेदेन तथात्व
ख्यातं तत्र द्वयकथनम् तथा हि इह लोके हि सप्तदशानामवयवानां भूतसूक्ष्मोपादानानां तदुपादाने चाविद्याश्रुतश्चोपाद
नोपादेययोरभेदान्नाविद्याभूतसूक्ष्मेभ्यः पृथग्विवक्ष्यते भूतसूक्ष्माणि च लिङ्गशरीरेभ्यो न पृथगभिप्रेयन्ते कामकर्मणो

वे.सा.
टी.
२५

समंश्रूयते तद्यथार्थक्रममेवाश्रित्य भूतभावमापन्नान्नस्मा [redacted] द्भूतयोनेरिन्द्रियोत्पत्तिराश्रिता तथा वन्यायः॥
ऽन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषादिति· नचैतेषां भौतिकत्वे प्रमाणाभावः अन्नमयं हि सोम्य मन
आपोमयः प्राणस्तेजोमयी वागिति श्रौतलिंगस्य प्रमाणसत्वात्॥ नच वागादिष्विन्द्रियत्वमप्रसिद्धमिति वाच्यम् अत्रया
ग्रा तं समारुह्य वाचाभि सर्वाणि नामान्याप्नोतीति कौशीतकोपनिषदि चक्षुरादिभिः सह वाचः समभिव्याहृतत्वात्· प्राथर्वणे च
चक्षुश्च द्रष्टव्यं चेत्यादिना सविषयाणीन्द्रियाण्यनुक्रम्य हस्तावादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च
पादौ च गन्तव्यं चेति हस्तादीनामपि सविषयाणां समभिव्याहृतत्वात् एतानि चेन्द्रियाणि स्वकार्यकादशैव भवन्ति न न्यूनानि नाधि

मनस्तु कर्मेन्द्रियैः सहितं सन्मनोमयकोशो भवति· कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि
एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यन्ते॥७५॥

85

कानि दशेमे पुरुषे प्राणा आत्मैकादश इति अत्र चानुराधेन मिश्रितत्वात् अत्रात्मशब्दो मनोविषयः प्राणाश्च दशेन्द्रिय
विषय इति भेदः· अणुत्वं चैषां परिच्छिन्नत्वे सति सूक्ष्मत्वलक्षणमभ्युपगन्तव्यं· नतु परमाणुलक्षणत्वम् तथा सति सर्वश
रीरव्यापिकार्यानुपपत्तिप्रसंगात् अपरिच्छिन्नत्वे चोत्क्रान्तिगत्यागतिश्रुतिव्याकोपप्रसंगः स्थूलत्वे चोत्क्रान्तिसमये बिला
न्निर्गच्छतीः वसर्पन्तीः शरीरा द्भिरेभ्यो निष्क्रममाणानीन्द्रियाणि प्रत्यक्षेणोपलभ्येरन्॥ न चोपलभ्यन्ते तस्मात्सूक्ष्म
कार्येणानुमेयानीन्द्रियाणि ननु अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिश्रुतेरग्न्यादिदेवतानामेव मुखादिस्थानेषु वागादीन्द्रियात्मना
प्रवेशश्रवणात्कथमेषां भौतिकत्वमुच्यत इति चेन्नैष दोषः देवतानामध्याधिदैविकगणानामात्मनो भौतिकदेहविशिष्टचेतनात्मा

अहंकारस्य चेतनात्मोपरक्तत्वात् आत्मैवेति अन्तेषु विषयभेदेपि स्वरूपाभेदस्योक्तत्वात् तद्भावः पूर्ववदेषां चतुर्णामप्यन्तःकरणभेदानां भौतिक-
त्वमाह· एतेष्विति· उक्तानां ज्ञानेन्द्रियाणामन्तःकरणानां च भूतगतसात्त्विकांशकार्यत्वे हेतुमाह· एतेषां प्रकाशात्मकत्वा-
दिति· तत्र सत्त्वं निर्मलत्वात्प्रकाशकं मम नामयामिति स्मृतेः। सत्त्वकार्यभूतः प्रकाशः इन्द्रियान्तःकरणेषु उपलभ्यमानस्तेषां
सत्त्वकार्यतां गमयतीत्यर्थः। लिङ्गस्य सप्तदशावयवलिङ्गशरीरे· उक्ते स्वावयवैः सिद्धमवान्तरभेदं कथयति· इयं बुद्धिरिति· बुद्धिग्रहणे
[illegible] तदुपहितचैतन्यस्य तद्व्यपदेशाभेदमाह अयमिति· अयं विज्ञानमयकोशाव छिन्नश्चिदा-
नार्थानामीव्यावृत्तिरभिन्नता तदुपहितचैतन्यस्य व्यपदेशाभेदमाह अयमिति· अयं विज्ञानमयकोशो भवति
एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वं इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति
॥ अयं कर्तृत्वभोक्तृत्वाद्यभिमानेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते ॥

तस्यान्तःकरणविशेषमाह ॥ व्यावहारिक इति व्यवहारिकमेव विशेषणान्तरेण व्याव-
र्त्याजीव इत्युच्यते इत्यन्वयः तस्य नामान्तरमनोविशेषमाह ॥ कर्तेत्यादि· तथा च श्रुतिः ॥ विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति कर्तृत्वादिकं चैतन्यात्म-
कोहलोकेति· तत्र हेतुमाह· कर्तेति· तथा च श्रुतिः ॥ समानः सन्नुभौ लोकावनुसंच-
रतीति वास्तवं किन्त्वाभिमानिकमित्यभिप्रेत्याभिमानित्वेनेत्युक्तं । तथा च श्रुतिः ॥ समानः सन् उभौ लोकावनुसंच
रति ॥ आपूर्णीवलेलायतीवेत्याद्या इवशब्देन व्यवहारस्याभासतां दर्शयति तथान्यायो च कर्ता शास्त्रार्थवत्त्वात् यथाव-
रति ॥ व्यावहारिकत्वं पारमार्थिकत्वे व्यवस्थापयतः पूर्ववन्मनः संबन्धमवान्तरभेदमाह ॥ मन
तदुभयधारयतिकर्तृत्वाकर्तृत्वयो व्यावहारिकपारमार्थिकत्वे व्यवस्थापयतः पूर्ववन्मनः संबन्धमवान्तरभेदमाह ॥ मन
स्त्विति· कर्मसाधनानां कर्मेन्द्रियाणि कर्मेन्द्रियाणि तानि विभजते ॥ कर्मेन्द्रियाणीति ॥ वचनादानगमनविसर्गानन्दा-
ख्येति· कर्मसाधनानां कर्मेन्द्रियाणि कर्मेन्द्रियाणि तानि विभजते ॥ कर्मेन्द्रियाणीति ॥ वचनादानगमनविसर्गानन्दा-
श्वेन्द्रियत्वं यथाक्रमं वागादीनां प्रत्येकं लक्षणं एतेषामपि पूर्ववद् भौतिकत्वमाह एतानि पुनरिति । ननु कथमिन्द्रिया-
णां भौतिकत्वं निर्दिश्यते यत एतेषां भूतयोनेः परमकारणात् ईश्वरात् उत्पत्तिः श्रूयते एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति·

वेदांती
२६

उदानो नामकंठस्थानीय ऊर्ध्वगमनवान् उत्क्रमणवायुः समानो नाम सर्वशरीरमध्यगोः शितपीतान्नपानादिसमीकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः संतीति वदंति॥ नाग उद्गिरणकरः कूर्म उन्मीलनकरः कृकलः क्षुत्करः देवदत्तो जृंभणकरः धनंजयः पोषणकरः। एतेषां प्राणादिष्वंतर्भावात्प्राणादयः पंचैवेति केचित् १

[illegible] नियतत्वात् [illegible] उदानः [illegible] समानो नाम [illegible] मतं [illegible] केचिदिति
नागः [illegible] उद्गिरणं छर्दिः उन्मीलन [illegible] निमीलितस्याक्ष्णः [illegible] पुष्टिः [illegible] उत्थापित
मतं प्रस्तावयति। एतेषामिति केचित्तु [illegible] विषयः। एतेषां नागादीनां प्राणादिष्वंतर्भावादिस्वभावमर्थः उद्गिरणे [illegible] मुखस्य [illegible]
[illegible] तथा चोदाने [illegible] नागस्यांतर्भावः तत [illegible] उन्मीलनस्यांगस्य
[illegible] कूर्मस्य [illegible] भावः समाने [illegible] कलस्य
[illegible] समाने [illegible] भावः [illegible]
[illegible] देवदत्तस्यानभावः [illegible] शरीरं

एतन्मतं प्राणादिपंचकं [illegible] इदं प्राणादिपंचकम्॥ कर्मेंद्रियैः
[illegible] भवति॥ [illegible] कार्यत्वम्॥

[illegible] तथा प्राणादीनामेव [illegible]
[illegible] प्राणादि [illegible]
[illegible] तथा [illegible] तथाच [illegible]
[illegible] ज्ञानं [illegible] तथा [illegible]
[illegible] समानो [illegible] मतः प्राणस्य [illegible]
[illegible] प्राणो [illegible]
मात्रं भवति। एतानि सत्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैत
न्यमात्रं भवति। एतदपि तत्सर्वमज्ञानं तज्ज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यं तुरी
यब्रह्ममात्रं भवति। आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। तथाहि अज्ञानादिसम
ष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत् त्रयं तप्तायःपिण्डवदेकत्वेनाव
भासमानं तत्पदवाच्यार्थो भवति ॥ ॥ ॥

भूताज्ञानोपहितचैतन्यमात्रं भवतीत्यर्थः। एतदाधारमित्यत्रैतच्छब्दोऽज्ञानतदुपहितचैतन्यविषयः। एतदाधारभूतेत्यादि ब्रह्मानन्तानं
दृष्टानोः कर्मधारयः। तथा च स्मृतिः सकलीभवतः जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वा
य्वोः प्रलीयते वायुश्चालीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते इति पुरुषान्न परं किं
चित्सा काष्ठा सा परा गतिः इति चाध्यारोपापवादनिरूपणे फलितमाह। आभ्यामिति ॥

दर्शयति॥ अस्मीति॥ अयमप्यस्यार्थस्तस्तोहि सः प्राणन्नेव प्राणो नाम भवतीति श्रुत्युपक्रम्य प्राणाद्यात्मविज्ञानमुक्त्वा विषय
तादेषणानिंदित्वा तेत्वात्मत्वमोपासीतात्र ह्येते सर्वे एकं भवंतीति इति स्वस्वात्मस्वभावं वेदितव्यं निर्दिश्य तदेतत्सत्त्वीय
मप्यस्य सर्वस्य यदयमात्मेति तद्व्यतिरिक्तस्य ज्ञानत्वस्यानवघोषं दर्शयंती श्रुतिः तद्विज्ञानवत एव विद्वत्तां सूचयति॥
तथा तत्रापि तद्धाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यंतो मनुष्या मन्यंते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति तदात्मानमेवावेदहं
ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति च विद्वदनुभवत्वं ब्रह्मात्मज्ञानस्य दर्शयति अतो हेतोः चक्षुरादिप्रत्यगात्मत्वाभि

अतस्तत्त्वम्पदाभासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावप्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदांतविद्वदनुभवः॥ एवम
ध्यारोपः॥ अपवादो नाम रज्जुविवर्तस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्यावस्तुनोऽज्ञानादिप्रपंचस्य वस्तु
मात्रत्वम्॥ तथाहि एतद्भोगायतनं चतुर्विधं सकलशरीरजातं भोग्यरूपान्नादिकमेतदाश्रयभूरा
दिचतुर्दशभुवनान्येतदाश्रयभूतं ब्रह्मांडं चैतत्सर्वमेतेषां कारणभूतपञ्चीकृतमात्रं भवति॥॥

मानोऽस्मीति इति भावः॥ प्रत्यगात्मविषयाध्यारोपमुपसंहरति॥ अत इति॥ वेदांतविद्वदनुभव इति विशेषणेन मतांत
रेऽनुभवस्य मूलप्रमाणशून्यत्वं सूचयति॥ अध्यारोपप्रकरणमुपसंहरति॥ एवमिति॥ एवमध्यारोपेण सप्रपंचं निरू
प्यापवादमिदानीं निरूपयिष्यंस्तल्लक्षणमाह॥ अपवादो नामेति॥ कार्यस्य कारणमात्रसत्तावधारणं कारणस्वरू
पव्यतिरेकेण कार्यस्याभावावधारणं वाऽपवाद इत्युक्ते एवंलक्षणोऽपवादः केन क्रमेणेत्यपेक्षायां विवक्षायां येनानुक्रमेणाध्य
उपपद्यते चेति न्यायमाश्रित्योत्पत्तिक्रमवैपरीत्येनापवादं क्रमेण दर्शयति॥ तथाहीत्यादिना॥ एतद्भोगायतनमिति॥

वे॰सा॰
६३

अतत्त्वमस्युपदेशस्याप्यविलक्षणत्वस्तात्पर्यमिति जातु तत्त्वंपदलक्ष्यार्थ इत्याह ॥ एतदुपाध्युपहितेति पदार्थ
प्रतिपत्तिपूर्वकत्वात् वाक्यार्थप्रतिपत्तेरादावध्यारोपापवादाभ्यां अवान्तरवाक्यावष्टंभेन पदार्थौ प
रिशोध्येदानीं महावाक्यार्थं निरूपयितुमुपक्रमते॰ अथेति॰ वाक्यार्थप्रतिपत्तिक्रमप्रदर्शनसंगत्वादिति॰
इदमिति॰ उक्तमेव विभजते॰ संबंधत्रयेणेति॰ उक्तविभागे नैष्कर्म्यसिद्धिवचनं संवादयति॰ तदुक्तमिति॰ भिन्न

तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मना-
मिति॰ सामानाधिकरण्यसंबंधस्तावत् यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवद-
त्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः त-
था तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवा-
चकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः ॥

अत्र भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे तात्पर्यसंबंधः सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणमभिप्रेत्य तत्सोदाह-
रणं तत्त्वंपदयोरनुवर्त्तयति॰ सामानाधिकरण्यसंबंधस्तावदिति॰ तत्कालोऽतीतकालः एतत्कालो वर्त्तमानकालः प-
रोक्षत्वादीत्यादिपदान्नियंतृत्वादिग्रहः॰ अपरोक्षत्वादीत्यादिपदान्नियम्यत्वादिग्रहः ॥

38

३१

कूलात्मचैतन्यस्याद्वितीयब्रह्मरूपतानिरूपणपर्यत्वादध्यारोपादिप्रपंचनस्य पदार्थशुद्धिरवान्तरफलमिति सूचयि
तुं पदार्थशोधनमपीत्युक्तं तत्त्वंपदयोः प्रत्येकं द्विविधौ वाच्यौ लक्ष्यश्चेति तदुभयं विभज्य दर्शयति॰ तथाहित्वा
दिना॰ समष्ट्यज्ञानेन तदुपहितईश्वरस्तदुभयाश्रयमनुपहितं स्वमहिमनिप्रतिष्ठितमक्षरशब्दवाच्यं चिन्मात्रमि
त्येतत्त्रयं तप्तायःपिण्डवदविविक्तं तत्पदवाच्यार्थः तत्पदार्थः॥ आदिपदात्समष्टिहिरण्यगर्भविराजोर्ग्रह्येते तत्रात्रा

एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति॰ अज्ञानादिव्यष्टिरेतदुपहितात्यज्ञत्वादि
विशिष्टचैतन्यमेतदनुपहितं चैतन्यं तप्तायःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति॰ एतदुपा
ध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति॰ अथ महावाक्यार्थो व
र्ण्यते॰ इदं तत्त्वमसि इति वाक्यं संबन्धत्रयेणाखण्डार्थबोधकं भवति॰ संबन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदा
र्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मनो लक्ष्यलक्षणभावश्चेति ॥

नादिव्यष्टिरित्यत्रादिपदात्सूक्ष्मशरीरं स्थूलशरीरं च गृह्यते॰ एतदनुपहितं प्रत्यक्चितिमात्रं प्रोक्तं पूर्ववत्॰ उभयत्रापि यथायोगमव्याहृ
तं समष्टिस्वप्नजागरौ सुषुप्तिर्व्यष्टिस्वप्नजागरौ चेत्येवमवस्थात्रयमुक्तमिति योजयितव्यं॰ अज्ञानतत्कार्यसमस्तप्रपंचे
षु सत्तास्फूर्तिप्रदत्वेनानुस्यूतं चित्सदानन्दाद्वयात्मकं वस्तु तत्पदलक्ष्यार्थः देहेन्द्रियमनोबुद्धिप्राणाहंकृतितद्धर्मजा

वाक्यार्थस्यानुपपत्तिरिति लक्षणायां प्रसक्तायां वक्ष्यमाणप्रकारेण जहदजहल्लक्षणयोः प्रकृतासंगतौ
पदद्वयस्य गतानाविरुद्धांशपरित्यागेनाविरुद्धांशपरलक्षणया सामानाधिकरण्ये सति वाक्यादखण्डार्थप्रतिपत्तिरि
ति भावः ॥ अंशान्तरपरित्यागेनांशान्तरलक्षणायाः शास्त्रप्रसिद्धां संज्ञां दर्शयति इयमेवेति । जहदजहल्लक्षणेदं
प्रकृतार्थः सर्वभावः तत्त्वंपदयोः सामानाधिकरण्यं नानुपपन्नं ते न तत्र योर्भिन्नार्थत्वे संभवति तेन कुम्भपदयो

३१ तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशपरित्यागेना
ऽविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः ॥ इयमेव भागलक्षणेत्युच्यते ॥ अस्मिन्वाक्ये नीलोत्पल
मिति वाक्यवद्वाक्यार्थो न संगच्छते ॥ तत्र तु नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्य
पटादिव्यावर्तकतयाऽन्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैकस्य
वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधाभावात् वाक्यार्थः संगच्छते ॥

स्तद्दृष्टान्तं न [illegible] कार्थाभिधायकत्वेन वैषम्यं दर्शयति अस्मिन्नेति । तत्र तत्त्विवादरेकार्थसमर्थकस्य कारणस्यैवादर्शनात् तथा
हि अभिहितान्वयवादिमते अभिहितपदानि आत्मस्वस्ववाच्यविषयार्थाभिधानमिति परिभाषया पदकार्यं लक्षणकत्वे
[illegible] तत्त्वंपदयोः सामानाधिकरण्यं विनापि लक्षणया ऐकार्थ्यमुपपद्यते नीलमुत्पलमिति वाक्यस्यार्थवत्वाह अस्मि
न्निति [illegible] विवक्षितत्वादित्यभिसंधिः ॥

व्यवच्छेदकं विशेषणं व्यवच्छेद्यं विशेष्यं तयोर्भावो विशेषणविशेष्यभावः स एव संबंधः संबंधश्च उभयनिरूपणीयत्वा
दित्याभिप्रेत्य विशेषणविशेष्यभावसंबंधः सहशब्देन माह ।। विशेषणेति ।। सोयं पदार्थयोर्मध्ये कस्य वा विशेषणा
ता कस्य विशेष्यता किं तत्र विशेषणकृत्यमित्यपेक्षायां द्वयोरपि पदार्थयोः परस्परापेक्षया विशेषणविशेष्यभा
वो भेदश्च मायाहश्च विशेषणकृत्यमित्यभिप्रेत्याह अन्योन्यभेदव्यावर्तकतयेति । अभिधेयाविनाभूतप्रवृत्तिर्ल
क्षणा सा त्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति । वाच्यार्थमशेषतः परित्यज्य तत्संबंधि

विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थ
एतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः तथात्रापि वाक्ये तत्प
दार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त
कतया विशेषणविशेष्यभावः । लक्ष्यलक्षणसंबंधस्तु यथा तत्र सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धत
त्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावसंबंधः ।।

मर्थान्तरे वृत्तिर्जहल्लक्षणा । वाच्यार्थापरित्यागेन तत्संबंधिनि वृत्तिरजहल्लक्षणा । वाच्यार्थैकदेशपरित्यागेनै
कदेशवृत्तिर्जहदजहल्लक्षणा । तत्र प्रकृतवाक्ये लक्ष्यलक्षणसंबंधस्योदाहरणमाह । लक्ष्य[illegible]लक्षणसंबंध इति । पदवाच्यार्थ
योः परस्परविरुद्धत्वान्नान्योन्यं विशेषणविशेष्यभाव उपपद्यते । तथा च तत्समर्पकयोरपि पदयोः सामानाधिकरण्यमेव शास्त्रतीयमानसेका

करणे: न यत्किंचित्प्रधानवाक्यमुपलभ्यते तच्छेषत्वेनेदमर्थवादरूपं भवेत् नापि राजपुरुषे 

त्वावधारणाच्च न केनापि प्रकारेण तत्त्वमादिवाक्यानां संसृष्टार्थनिष्ठत्वशंकावकाशं लभते न चेदं वाक्यं त्वमि
त्यसीति वस्त्विति परं न वक्तुं शक्यं अभ्यासवैयर्थ्यप्रसंगात् नाहिस्त्विति: पुनः पुनः परिचोदनापूर्वकं कश्चिदभ्यस्यते. प्र
तएव नार्थवादः अनन्यपरत्वाच्च न चास्मिन्नयं राजा यमिव ज्योपचारिकं अप्रमितभेदयोरैक्यस्योपचारिकत्वानु
पपत्तेः नापि विपर्ययः संभाव्यो वा स्वतः संभवति श्रुतेः स्वतः प्रामाण्यात् तस्मात्तत्त्वमस्यादिवाक्यमखण्डार्थं

40

अत्र तु गंगायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणा न संगच्छते ॥ अत्र गंगाघोषयोराधाराधेयभा
वलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबंधितीरलक्ष
णा यथा युक्ता जहल्लक्षणा संगच्छते. अत्र तु परोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकत्वलक्षणस्य
वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्ष
णा न संगच्छते ॥

निष्कृष्टकार्यकारणाद्यर्थमात्रनिष्ठत्वे सति समानाधिकरणवाक्यत्वात् ॥ सोऽयं देवदत्त इति वाक्यवदि
ति तदेवं पदयोरखण्डार्थनिष्ठत्वेन सामानाधिकरण्यं वाच्यार्थयोर्विरोधात् विना लक्षणां न संगच्छत इत्यु
क्ते तत्र भाग लक्षणा [illegible] न परिशोधयितुं लक्षणान्तरमुपदिशति· अत्रेत्यादिना ॥ घोषग्राभीरनिवासः कुत इ
तो [illegible] लक्षणा भवति वाच्यार्थस्य तत्र घोषस्यानन्वयेन परित्यज्य त्वादित्याह ॥ अत्र गंगा
[illegible] परित्यागायोगान्न जहल्लक्षणा संगच्छत इत्याह अत्रापीति ॥॥

[illegible] नवेति। शोणत्वादिव्यावर्तकनीलगुणस्य पटादिव्यावर्तकोत्पलद्रव्यस्य
[illegible] भावान्नैतत्संसर्गस्य वा तदन्यतरविशिष्टस्यान्यतरस्य वा वाक्यार्थत्वान्नाखण्डार्थत्वं
मुख्येऽर्थे [illegible] इत्यर्थः। प्रकृतवाक्ये नीलोत्पलवाक्यवैषम्यमाह। अत्रेति। यद्यपि तत्त्वंप
दार्थयोः स्वरूपतोऽभेदस्य वास्तवत्वेऽपि तत्पदार्थस्याद्वितीयत्वात् त्वंपदार्थस्य च दुःखित्वान्न दृष्टत्वानुपपत्तेः तथा च तद्भे
दस्याप्यसत्यत्वेनातथापि तत्त्वंपदयोः परोक्षापरोक्षादिगतसंगत्योः श्रवणसमयेऽपरिशोधितपदार्थस्य पुंसो

अत्र नु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्या
वर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य च तद्भेदस्य वाक्यार्थत्वाभि[illegible]
रे प्रत्यक्षादिप्रमाणान्तरविरोधात् वाक्यार्थो न संगच्छते

वि

भवति रोधस्फूर्तिरिति तदपेक्षया प्रत्यक्षादिप्रमाणविरोधादित्युक्तं। तथा च तत्त्वंपदयोः शबलांशयोर्मुख्ययो
विरुद्धार्थविशेषकत्वेनैकत्वनिष्ठत्वाभावान्न विवक्षितसामानाधिकरण्यमुपपद्यत इति भावः॥ एतदुक्तं भ
वति न तावत्त्वमर्थयोः नीलोत्पलवद्गुणगुणीभावः उभयोरपि द्रव्यत्वात्। नापि कुण्डलसुवर्णवत्कार्य
कारणभावो नित्यत्वादविकृतत्वाच्च। नापि भूम्यघटादिवदंशांशिभावो निरवयवत्वात्। नापि क्रियातद्वा
वोः शाणादिनिष्क्रियत्वात्। नापि गोत्वशाबलेयादिवज्जातिव्यक्तिभावो द्रव्यत्वादेव। अत एव नापि विशेषणविशेष्य
भावोऽपि वस्तुतस्तत्त्वविदां घनमात्रत्वावधारणान्नेति नेति अशेषविशेषप्रत्याख्यानेन निर्धर्मक

प्रकारांतरेणाऽऽह लक्षणामुद्धृत्य निराचष्टे। न चेति· सकेऽऽतस्यैकस्य पदस्य युगपदुभयलक्षकत्वासंभवादित्यर्थः॥ अत्रापि
पूर्वोक्तं दूषणं प्रसंजयति· पदांतरेणेति· परिपोषाङ्गलक्ष [illegible] णामन्तरेणाखंडवाक्यार्थसिद्धिरतस्त
त्यैवलक्षणार्थैकार्थ्यपर्यवसायित्वेन पदयोः सामानाधिकरण्यमित्युपसंहरति· तस्मादिति· सोऽयमिति पदद्वयं वाक्य
घाकार्थः देवदत्तपदस्य सामानाधिकरण्यसिद्धेरस्य स्वीकरणे पर्यवोऽल्लक्षणा विचारानुपयोगात्· यद्यपि
दृश्यमेलक्षणा तथापि श्रमिहितान्वयमते तत्पदार्थस्यापि लक्षकत्वमभ्युपगम्य पदार्थोवेत्युक्तं अन्यत्समानम्·

नयतत्पदं त्वंपदे वास्यार्थविरुद्धांशपरित्यागेन अंशयोरन्तरसहितं तत्पदार्थैकत्वे पदार्थैवालक्षयतु अतः कथं प्रकारा
42 न्तरेणाभागलक्षणांगीकरणमितिवाच्यम्· एकेन पदेन स्वार्थपरार्थान्तमेभयलक्षणायास्संभवात्· पद
न्तरेण तदर्थप्रतीतौ लक्षणायाः पुनरस्तत्वतोऽसपेक्षाऽभावाच्च· तस्माच्च यथा सोऽयं देवदत्त इत्यत्र वाच्यं तदर्थावि
तत्काले तत्कालविशिष्टदेवदत्तलक्षणायास्य वाक्यार्थस्यांशमीविरोधाविरुद्धं तत्काले तत्कालविशिष्टपापर
त्यज्याविरुद्धदेवदत्तांशमात्रं लक्षयतीति॥

अत्र केचिदाहुः· पदद्वये लक्षणानुपपन्ना सोऽयं देवदत्त इत्यत्र समष्टे नातीतदेशकालपरित्यागेन लक्षितदेवदत्तस्वरूपे वर्त
मानदेशकालवैशिष्ट्यमर्थं परेन प्रतिपाद्यते तथाच पूर्वोत्तरदेवदत्तस्वरूपाऽभेदसिद्धिरिति तदयुक्तं
विशिष्टस्य केवलाद्भिन्नत्वात् यथा केवलो विशिष्टाद्भिन्नस्तथा विशिष्टोऽपि केवलाद्भिन्न एव तथाच
विशिष्टा [illegible] यस्सांशं स्यापि विनालक्षणां न स्वरूपनिष्ठत्वं भवति तदभावेऽपि न सोऽयं पदयोः सामानाधि
करण्येन देवदत्ते [illegible] त्यास्तां तावत्· अपरे पुनराहुः न पदवाच्यार्थयोः पारस्परविरोधाल्लक्ष
[illegible] ल्लक्षणासर्वथाभावागमस्यापि विरोधस्फुटीभावात्· अन्यथा देवा
[illegible] श्रातेति ४०

[illegible] विशिष्टभागत्यागेन विशिष्टस्वार्थपरित्यागाज्जहल्लक्षणैव तत्त्वंपदयोर
[illegible] स्वार्थपरित्यागेन नन्वेति। यथा पदादेव वाक्यार्थान्वयिपदार्थप्रतीतौ लक्ष
णादेयर्थ [illegible] विशिष्टांशपरित्यागेन लक्षणैवेयर्थीत तत्त्वंपदयोः। नच गंगापदं स्वार्थपरित्यागेन यथा तीरपद
[illegible]
नच गंगापदं स्वार्थपरित्यागेन यथा तीरपदार्थं लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं
त्वंपदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न संगच्छते इति वाच्यं तत्र तीरपदाश्रवणेन तदर्थाऽप्रतीतौ
लक्षणया तत्प्रतीत्यपेक्षायां अपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरप
देनाऽन्यतरपदार्थप्रतीत्यपेक्षायाअभावात्। अत्र शोणो धावतीति वाक्यवद् जहल्लक्षणापि न संभ
वति शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तत्
द्विरोधपरिहारसंभवाद् जहल्लक्षणा संभवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्ष
णवाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधापरिहाराद
जहल्लक्षणापि न संभवत्येव।

र्थातिरिक्तस्य तत्संबंधिनो वाक्यार्थान्वयिनोऽर्थस्याप्रसिद्धेरितिभावः। अजहत्स्वार्थामप्यत्र व्युदस्यति। अत्रशोणाद्याते। शोणपदे स्ववा
च्य शोणगुणपरित्यागेन तदाधारे लक्षणावत्तत्पदे त्वंपदे च स्ववाच्यापरित्यागेन तत्संबंधिनो यस्य कस्यचिन्निर्दिष्टवि
रोधस्यार्थान्तरस्य प्रतीत्येलक्षणांगीकरणेऽपि वाच्यार्थयोर्विरोधस्यापरिहारान्नाजहल्लक्षणाप्यत्र युज्यत इत्यर्थः।

नचि · चित्प्रतिबिंबसहितासतीति · प्रत्यक्चितिच्छायेति यावत् · अज्ञातमिति विषयीकरणं नाम तदविच्छिन्नं सदभिमुखत्वं · अज्ञानमात्रस्य कार्यं ब्र
ह्मविषयत्वं तस्मात्तद्विषयीति · घटमिति · तस्य प्रमेयत्वमाह · अज्ञातमिति · तस्य तादृश्यं वारयति · प्रत्यगभिन्नमिति · अज्ञानमे
व बाधते · तत्त्वावकारणम् अज्ञानं लः · प्रकाशयत्वं व्यावर्तयति · एवं विधया चित्तवृत्त्या संसारमूलाज्ञाने बाधिते समस्तस्य तत्कार्यस्य
घटकाभावान्नोत्पत्तिः सप्रपंचः स्यादित्यत आह · तद्धितेति · तत्तेवाधकाभावेपि ज्ञानात्ललवस्वयमेव विनश्यतीति तत्तानसप्र
पंचोमोक्ष इत्यर्थः ॥ तर्हि तत्प्रतिबिंबितचैतन्यस्य कागतिरिति तामाह · तत्रेति · तत्र प्रतिबिं[illegible]स्वयं चित्तवृत्ते
र्बाधितत्वात् प्रत्यगभिन्नपरब्रह्ममात्रं भवतीत्यन्वयः स्वोपाधिविलये उपहितस्य स्वस्वरूपमात्रावस्थाने दृष्टान्तो दर्पणाभावे
इति · उपाध्यनुगामिनो निरुपाधिप्रकाशनासामर्थ्ये दृष्टान्तमाह · यथा दीपप्रभेति · यद्वापरिच्छिन्नप्रकाशस्यापरिच्छिन्नस्य

तदैतद्गताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति · तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभादित्य
प्रभावभासनासमर्था सती तयाभिभूता भवति · तथा स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हत
या तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वात् दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यगभि
न्नपरब्रह्ममात्रं भवति · एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुते इत्यनयोः श्रुत्योरविरोधः वृत्तिव्या
प्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् · तदुक्तं फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ब्र
ह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता इति · स्वयंप्रकाशमानत्वान्नाभास उपयुज्यत इति ·

भासने दृष्टान्तो यथा दीपेति · वाक्यजन्यतादृशात्माकाराचित्तवृत्तिस्तद्गताज्ञानमेव बाधते न तु तत्प्रकाशयतीति विशेषनिरू
पणफलितमाह · एवं चेति · अविरोधः स्फुट इति शेषः तत्रैवं ग्रन्थसंमतिमर्थे हेतुमाह · वृत्तिव्याप्यत्वेति ॥ विशिष्टशब्दादि
जन्मनो ज्ञानाद्विशब्दाकारधीसमुत्पन्नेषां भिव्यक्तस्ववृत्तिव्याप्यत्वं · बाह्येन्द्रियसन्निकर्षाभावात्कारणाय
[illegible]व्यावच्छिन्न[illegible]प्राकृसोऽस्य प्रत्वफलव्याप्यत्वमिति भेदः ॥ उक्तेर्थे वृद्धसंमतिमाह · फलव्या
[illegible]शाधयति · स्वयंप्रकाशेति ॥

42

[illegible] ...ति यथोक्तेऽर्थे तात्पर्यानवगमायोगात्. तस्मात्सुष्ठूक्तं वाक्यार्थस्यापरोक्षविरोधादिति तद्दृष्टान्तत्वेनेतत्प्रागुक्तं [illegible] ये तिष्ठेदिति न्यायेन जीवस्य नित्यशुद्धबुद्धमुक्तसत्यस्वानानन्तानन्दपरिपूर्णब्रह्मात्मत्वोपदेशवाक्यार्थसम्पन्नं निरूप्येदानीमवगतस्वरूपस्यानुभवावभासिवाक्यार्थं वर्णयितुमुपक्रमते. अथेति. उपदेशवाक्यार्थनिरूपणानन्तर्यमथपदार्थः. अधिकारिणो विधिवदधीतवेदत्वाद्यैहिकलौकिकलक्षणस्य असंभावनाविपरीतभावनात्मकचित्तदोषरहितस्याध्यारोपापवादन्यायेनाचार्योपदेशसमनन्तरमेव नित्यशुद्धत्वादिविशि

ष्टात्तत्त्वमसीति वाक्यं तदर्थो वा परोक्षापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यापरोक्षविरोधादिरूपपरोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धचैतन्यमात्रं लक्षयतीति. अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते. एवमाचार्येणाध्यारोपापवादपुरःसरं [illegible] यित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्तानन्दाद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति. सा तु चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते. यथा पटकारणतन्तुदाहे पटदाहवदखिलकार्यकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्.

सर्वं ब्रह्माहमस्मीत्यखण्डाकारान्तःकरणवृत्तिरुदेति साक्षात्काररूपा न पुनः परोक्षार्थकादितेत्यर्थः. न च वाच्यं स्वपरोक्षज्ञानजन्यत्वसंभावनान्तेनापरोक्षाखण्डचित्तवृत्तिरुदेतीति वाच्यम्. यस्मादापरोक्षात् [illegible] सर्वातिरिक्तं [illegible] परोक्षं ब्रह्मास्मीत्यहं [illegible] जनयतः [illegible] किं [illegible] परोक्षत्वापरोक्षत्वेन करणनिबंधनेऽकिंत्वर्थनिबंधने एक [illegible] परोक्षत्वज्ञानहेतुत्वस्यातीतार्थस्य [illegible] हेतुत्वस्य [illegible] तत्र सहकारिभेदतयाभावादिति चेत् [illegible] प्रत्यक्षत्वम् [illegible] स्वरूपं ब्रह्मत्वस्वरूपमुपाधेः [illegible] रूपादिरूपं. तस्माद्ब्रह्म तत्त्वमसीत्यादिवाक्यजन्यज्ञानमस्यादिवाक्यानामपरोक्षज्ञानजनकत्वं युक्तमिति भावः. एवमुत्पन्नाखण्डाकाराचित्तवृत्तिः किं करोतीत्यत आह. सा त्विति. [illegible] न बाधनासंभवमापरोक्षतां [illegible]

ब्रह्मलोपेति त्वादि फलं तद्यो यो देवानामित्याद्यर्थवादः सयथा
दुंदुभेरित्याद्युपपत्तिः तस्मात्तैत्तिरीये त्रुटिः ५

वे.सा.
टी.
६२

तदनुष्ठानस्य चेति सगुणविद्याभिप्रायेणोक्तं ॥ आचार्यवान्पुरुषो वेदेति साक्षाच्चर्यादिहेतोर्नहतं न पुनः फलव
चनं तत्र तस्य तावदिति तु फलवचनमिहोदाहरणमिति द्रष्टव्यम् उदाहरणान्तरं स्पष्टार्थं ॥ तथा च न्यायो
वाच्चारंभणाधिकरणे तस्य पत्तिपरत्वनिर्णयपरस्तदनन्यत्वमारंभणशब्दादिभ्य इति ॥ एवं शास्त्रान्तरेषूपक्र
मोपसंहारादि निरूपणीयं तथाहि छांदोग्ये तावत् आत्मैवेदमग्र आसीतात्र ह्येते सर्व एकं भवंतीत्युपक्रमः पूर्ण
मद इति उपसंहारः सयथेति त्वेतस्मिन्नभ्यासः नैतोपनिषदं पुरुषं पृच्छामीत्यपूर्वत्वं अभयं वै जनक प्राप्तोसीत्येवं

13

लिंगानि तु उपक्रमोपसंहारावभ्यासोऽपूर्वता फलार्थवादोपपत्त्याख्यानि प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपा
दनमुपक्रमोपसंहारौ यथा छांदोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादा
टी३ वैतदात्म्यमिदं सर्वमित्यंते च प्रतिपादनं प्रकरणप्रतिपाद्यवस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः यथा
तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं प्रकरणप्रतिपाद्यस्यार्थस्य प्रमाणान्तराऽवि
षयीकरणमपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणं ॥ फलं तु प्रकरणप्रतिपाद्यात्मज्ञानस्य तद
नुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संप
त्स्ये इति अद्वितीयवस्तुनो ज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः यथा तत्रैव

ब्रह्मविदाप्नोति [illegible] परमित्युपक्रमः आनंदो ब्रह्मेति व्यजानादित्युपसंहारः सपरज्ञायमभ्यासः यो वेद निहितं गुहाया
[illegible] अथ सोऽभयं गतो भवतीति फलश्रुतिः सोऽकामयत बहु स्यामित्याद्यर्थवादः असन्नेव स भव
[illegible] नेदमनेन ततो विदुरिति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो
[illegible] गम्यत इत्याद्युपक्रमः ब्रह्मैवेदममृतं पुरस्तादित्युपसं

२५३

[illegible] त्वात्. प्रत्यक्षत्वाभावाच्च घटादिवत्. यद्वा ब्रह्मलोकाप्तिः सकर्मिकाः परोक्षयति
त्वा [illegible] ति व द्विरूपाश्चेति [illegible] अनुमाने जडत्वमुपाधिः तत्र संश्लिष्ट जडविषयत्वमुपाधिरित्यभिप्रायाह जडपदार्थेति
प्रतिमात्र [illegible] दर्शयति. तथाहीत्यादिना इति प्राक्क्षेणानुभववाक्यार्थनिरूपणे समाप्तप्रायः। इदानीमावृत्तिरसकृदु
पदेशादिति न्यायमाश्रित्य [illegible] विधयसाक्षात्काररूपानुभवदार्ढ्यपर्यन्तमनुष्ठेयश्रवणादिसाधनजातं निरूपयितुमारभ
ते. एवमित्यादिना तथा च श्रुतिः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरिति पाण्डित

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति तथाहि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृ
त्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति तदुक्तं बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं तत्रा
ज्ञानं धिया नश्येत् चिदाभासेन घटः स्फुरेत्. यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकार
निरसनपुरःसरं स्वप्रभया तदपि भासयतीति। एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमा
ध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते. श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणं

पाण्डित्यबाल्यमुनिपदैः क्रमेण श्रवणमनननिदिध्यासनानि विधीयन्ते तथा तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते वि
श्वमायानिवृत्तिरिति श्वेताश्वतरीयो मन्त्रः समाध्यनुष्ठानं सूचयति. सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्या
दिति न्यायेन [illegible] निर्णीतः. श्रवणादीनां लक्षणमाह. श्रवणं नामेत्यादिना।। गतिसामान्यादिति न्यायमाश्रित्याऽऽह अशेष
वेदान्तानामित्युक्तं तस्यानन्तोऽपि परस्यामयलिंगं सर्वत्रेति न्यायमाश्रित्याद्वितीये वस्तुनीत्युक्तम्. लिंगानि कानीत्यपे
क्षायां तानि विभजते. लिङ्गानि त्विति।। उपक्रमोपसंहारावभ्यासो [illegible] लिंगं तात्पर्यनिर्णये इति. यथा छान्दोग्य इति. पुनः पु
नरित्यस्य भावः पौनःपुन्यं तत्रैव छान्दोग्ये षष्ठे. मानान्तराविषयीकरणं आचार्यवान्पुरुषो वेदेति सूचितमित्यपूर्वता॥

एवं ब्रह्माकाराकारितवृत्तौ ज्ञात्राद्याकारे उल्लिख्यमानेऽपि ब्रह्मैव सत्यं भासते तेन ज्ञात्रादिविकल्प इत्यर्थः॥ कथं तत्र ब्रह्म भास
ते इत्यपेक्षायां पूर्वाचार्यैः समुदाहृतमनन्तस्वरूपमाह· तदुक्तमभिनीयेति· अभिनयमंगचेष्टाविशेषण इत्यर्थः दृशि
स्वरूपं चैतन्यघनं विज्ञानघन एवेत्यादिश्रुतेः गगनोपमं सर्वगतं· आकाशवत्सर्वगतश्च नित्य इति श्रुतेः परं मायातीतं अक्षरा
त्परतः परः इत्यादिश्रुतेः सकृद्विभातं एकदेव कृत्स्नमभिव्यक्तं सकृद्विभातो ह्येवास्मै भवतीत्यादिश्रुतेः तु शब्दः पाद
पूरणार्थः अजं जन्मादिविकारशून्यं न जायते म्रियते वा विपश्चिदित्यादिश्रुतेः। एकं सजातीयविजातीयस्व

44

तदुक्तमभिनीय दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं। अलेपकं सर्वगतं य
दद्वयं तदेव चाहं सततं विमुक्तं ॐ इति निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पभेदलयापेक्षया
द्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानं। तदा जलाकाराका
रितलवणानवभासेन जलमात्रवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्विती
यवस्तुमात्रमेवभासते·

रं॥ एको देव एकं सन्तं बहुधा कल्पयन्तीति श्रुतेः अक्षरं कूटस्थं नित्यं येनाक्षरं पुरुषं वेद सत्यमिति श्रुतेः अलेपकं निरवद्यं
निरंजनमिति श्रुतेः सर्वगतं सर्वानुस्यूतं सन्मात्रं यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं इत्यादिश्रुतेः यदद्वयं स्वगतभे
दशून्यं अशब्दमस्पर्शमरूपमित्यादिश्रुतेः तदेव चाहमस्मि अहं ब्रह्मास्मीति श्रुतेः। अतोऽहं सततं सर्वदैव विमुक्तो नक
[illegible] विमुक्तश्च विमुच्यत इति श्रुतेः इति श्लोकार्थः। निर्विकल्पकसमाधिं लक्षयति· निर्विकल्पकस्त्विति· अत्राप्य
[illegible] दृष्टांतः। तदा जलेति· दृष्टांतदर्शितमर्थं दार्ष्टांतिके योजयति· अद्वितीयेति·

... तमद्वैतं जानीथ आत्मानमित्याद्यभ्यासः। नचैष वाग्वत्तेनापि वा
... तार्था इत्यनेनाद्वैततासूचनं निरंजनः परमं साम्यमुपैति ब्रह्मवेद
... यथा मृत्पिण्डाद्यात्मा ... तद्विस्फुलिंगोऽस्यार्थवादः कस्मिन्नु भगवो विज्ञाते सर्वमिदं
विज्ञातं भवति ... न सर्वविज्ञानप्रतिज्ञारूपाद्युपपत्तिः एवं एतदेव यादृशश्रुतिव्याख्यानान्तरेषु उपक्रमाद्यु
नीयं मननं लक्षयति। मननं त्विति केवलं पुरुषबुद्धिमपेक्षितं श्रुत्वा तर्कं न्याय स्यर्थ वेदान्तानुसरेणेति विपूर्वकं॥

तमाहेपूर्णमसाध्योयेनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रसंगेन मध्ये प्रकरणप्रतिपाद्य
स्य साधनेन तत्र श्रूयमाणो युक्तिरुपपत्तिः तत्र यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभ
णं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्याद्यद्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिरूप
त्तिरुच्यते। मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिंतनम्। विजातीयदेहादि क्रि ४
प्रत्ययरहिताद्वितीयवस्तुनि सजातीयप्रत्ययप्रवाहो निदिध्यासनं। समाधिर्द्विविधः सविकल्पो निर्विकल्पश्चेति तत्र सविक ९२
ल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मयग
जादिभानेपि मृद्भानवत् द्वैतभानेप्यद्वैतं वस्तु भासते॥

अधिधर्मो परे पंचवेदप्रास्याविरोधिना यस्त ... कोऽनुसंधत्तेऽस्य धर्मो वेदेनेतर इति स्मृतेः। अत्र धर्मेणात्मेत्यत्र लक्षणार्थः।
अन्वयरते परं मननं स्यादवधयकत्व ध्यानं नाम निदिध्यासनं लक्षणमाह विजातीयेति। चित्तस्यैकत्रैकालम्बना ... समाधिः
तं विभजलक्षयति। समाधिरित्यादिना। सविकल्पकः सम्प्रज्ञातसमाधिः निर्विकल्पकः असम्प्रज्ञातसमाधिरिति ... सन्ता ...
तत्र सविकल्प समाधि ... ध्यातृध्यानध्येयेति त्रिपुटी विकल्पाभिभवात् ... भावस्तदनपेक्षा ध्यानाद्विविकल्पो
... पूर्वकमिलिताच्च अद्वितीयेति ... सविकल्पक समाधि ... तदा दृष्टान्त ... यथा मृत्तिका
गजे कुंभकारादि निर्मिते गजो मृत्तिका ... गजाकारस्य मिथ्यात्वानिश्चयात्

प्र ४

...यामां च एकाग्र्यं परमं तपः इत्याद्युक्तलक्षणं तपः इत्याद्युः सर्वे यातु नात्र चोदनायत्नादिस्तपः पादार्थः तस्य समाधिनि रोधित्वादिति प्रणवस्वाध्यायः प्रणवजपः उपनिषदभ्यास ओमित्येवं ध्यायथ आत्मानम् अन्यावाचो विमुंचथ उपनिषदमावर्त्तयेदुपनिषदमावर्त्तयेदिति श्रुतेः ईश्वरप्रणिधानं तस्य मानसे संचारेभ्यर्च्यनं तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति मंत्रलिंगात् आसनादीनि कथयति करोति स्वस्तिकादीनीत्यादिपदत्रयेण वीरास

कमुचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहारः अद्वितीयवस्तुन्यंतरिंद्रियवृत्तिधारणं धारणा तत्राद्वितीयवस्तुनि विच्छिद्यविच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानं समाधिस्तूक्तलक्षणः सविकल्पएव ॥ अस्य निर्विकल्पस्यांगिनो लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति ॥

नादिग्रहः रेचकः प्राणवायोः शनैः वामनासापुटाद्दक्षिणनासापुटाद्वा सव्यापसव्यन्यायेन बहिर्निःसरणं पूरकस्तस्य तथैवांतः प्रवेशनं कुंभकस्तु पूरितस्य वायोरंतरेव निरोध इति भेदः समाधेर्ध्यानस्य भेदं द्योतयितुं विच्छि [illegible] विच्छि [illegible] गमम् अन्यत् एवं सांगसमाधिमनुतिष्ठतो यदा तिरस्करणाद्विराग्य विप्रवत्याग चौरज्वरातु [illegible] न भवति तदा तान्निवृत्ति लौकावगतसाधनावलंबनेन कार्य्या यदा तु मनस्येव विघ्न [illegible] पायमुपदेष्टुकामस्तत्स्या निवृत्त्यान्निर्दिशति । अस्येति । लयादीन्वि

६ न्यात ... त्तत्र निर्विकल्पकसमाधिलक्षणमतिव्याप्नोतीमत आह· ततश्चे
नि·तत्र हेतुमाह· उभयत्रापि सुषुप्तावुक्तेरिव नास्ति बुद्धेः कारणात्मनावस्थानस्य तल्लक्षणत्वात् इहतु बुद्धिवृत्तेरहि
नायवस्था ... राकारितया अवस्थानांगीकारात्सुषुप्तेर्भेदोपपत्तेरितिसर्वं ।। नापि मुक्तावतिव्याप्तिः । तत्राविद्या
तत्कार्य्यसंस्काराणामस्तित्वसमुच्छेदादिह पुनर्व्युत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेरिष्टत्वात्· नापि जीवन्मु
क्तोप्रसंगः । तस्य व्युत्थानदशायामपि बाधितानुवृत्तिमात्रप्रपंचावभासेपि स्वस्वरूप एवावस्थानात्साधकस्य

तत श्चास्य सुषुप्तेश्चाभेदशंकान भवति· उभयत्र वृत्त्यभाने समाने पि तत्सद्भावासद्भावमात्रेण तयो
र्भेदोपपत्तेः । अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयः । तत्राहिं
सासत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः

बाधितानुवृत्तिमात्रप्रपंचावभासाभावादिति द्रष्टव्यं ।। उक्तनिर्विकल्पसमाधिस्वरूपोपकारकाण्यंगान्याह अस्ये
ति· तत्र यमानाह· तत्रेति· वाङ्मनःकायैः परपीडावर्जनमहिंसा सत्यं यथार्थभाषणं अस्तेयं अदत्तादानरूपपरस्वहरण
राहित्यं ब्रह्मचर्य्यं अष्टांगमैथुनवर्जनं तथाचोक्तं स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोध्यवसायश्च
क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः· विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणमिति· अपरि
ग्रहः समाध्यनुष्ठानानुपयुक्तस्य वस्तुमात्रस्यासंग्रहः । नियमानाह· शौचेति· शौचं बाह्याभ्यंतरलक्षणं तदुक्तं
शौचं तु द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरमिति· संतोषो यदृच्छालाभसंतुष्टिः ।।
अलाभे चाविषादः तपः कामानशनेन तपो नानशनात्परमिति श्रुतेः अनशनं चक्रचान्द्रायणमेव केचिन्मनसश्चै

वे. सा.
टी.
४५

कारेण ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूते अविद्या तत्कार्यात्मकसर्वसंसारनिवृत्तौ जायमानायां काकतालीय-
न्यायेन यदि प्रारब्धकर्मक्षयात्तत्काल एव विदुषः शरीरपातस्तदा सद्य एव मुक्तिः स्यात् यदि तु ज्ञानोत्पत्तिस-
मये प्रारब्धकर्म न क्षीयते तदा तत्क्षयपर्यन्तं शरीरस्यावस्थानात् जीवन्नेव मुक्तः संसारो भवति तस्य लक्षणं वक्तुं
प्रतिजानीते· अथेति अथ यथावत् साधननिरूपणानन्तरमित्यर्थः॥ लक्षणमाह॥ जीवन्मुक्तो नामेति· ब्रह्मनिष्ठत्वं वेदान्तवे-
द्यब्रह्मात्मनावस्थितत्वं ब्रह्मनिष्ठो जीवन्मुक्त इत्युक्ते परमाप्येतो ब्रह्मनिष्ठत्वमयुक्तस्याप्यस्तीत्यतो विशिनष्टि॥

46

अथ जीवन्मुक्तलक्षणमुच्यते· जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्व-
स्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वाद-
खिलबन्धरहितो ब्रह्मनिष्ठो भवति॥

अखिलबन्धरहित इति· परममुक्तवैधर्म्यसिद्धये प्रारब्धकर्ममात्रशेष इति विशेषणान्तरमध्याहर्तव्यं क-
थमसौ मुक्त इत्यपेक्षायामाह॥ अज्ञानतत्कार्येति॥ अज्ञानं सदसद्भ्यामनिर्वचनीयमित्याद्युक्तलक्षणं तत्का-
र्यं स्थूलसूक्ष्मप्रपञ्चद्वयं संचितकर्माणि नामत्ते: प्रागुत्पन्नमनारब्धफलं संशयो देहाद्यतिरिक्तो ब्रह्मस्व-
रूप आत्मा भवति न वेति अथवा ब्रह्मात्मविज्ञानान्मोक्षो भवेन्न वेत्यादि विचिकित्सा विपर्ययो देहा-
दिष्वात्माभिमानादिलक्षणः आदिशब्दात् प्रपञ्चे सत्यत्वबुद्धिः॥ एतेषां बाधितत्वान्मुक्त इत्यर्थः॥ एत-
[illegible]रहित्यपेक्षायामाह॥ स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते सतीति· साक्षात्कारे साधनमाह॥ स्वस्वरू-
पाखण्डब्रह्मज्ञानेनेति॥

भव [illegible] यति [illegible] ॥ उक्तलयादिविघ्नचतुष्टयाभावेन चित्तस्य तत्तैयवस्तुनियन्तैश्चलत्वं तद्धारते
निर्विकल्पसमा [illegible] ॥ एतदिति ॥ विघ्ननिवृत्त्युपायं समतिप्रदर्शनेन [illegible]
[illegible] ॥ लये संबोधयेत् उक्तं भयेत्सोत्साहं मनः कुर्य्यादिति यावत् विक्षिप्तं चित्तं धैर्य्या
वलंबनेन पुनः [illegible] न रहितो यवस्तुनिष्ठं कुर्य्यादित्येतत् सकषायं चित्तं विजानीयात् कलुषितं मे चि

त्तं यस्मात् अखंडवस्त्ववलंबनेन चित्तवृत्तेर्निद्रा अखंडवस्त्ववलंबनेन चित्तवृत्तेरन्या
वलंबनं विक्षेपः लयविक्षेपाभावेपि चित्तवृत्तेः संगादिवासनया स्तब्धीभावादखंडवस्त्ववलंबनं कषायः ॥
अखंडवस्त्ववलंबनेनापि चित्तवृत्तेः सविकल्पकानंदास्वादनं रसास्वादः समाध्यारंभसमये सवि
कल्पकानंदास्वादनं वा ॥ एतत् विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदखंडचैतन्यमात्रमवतिष्ठ
ते यदा तदा निर्विकल्पसमाधिरुच्यते ॥ तदुक्तं लये संबोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः सकषायं विजानी
यात्समप्राप्तं न चालयेत् नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेदिति ॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति ॥

न मितिविक्षायन्त्र समेः द्वितीयचेतनात्मनि निक्षिप्य पुनः समप्राप्तं तन्न चालयेत् तत्रैव प्रयत्नपूर्वकं स्थिरीकुर्य्यादित्य
र्थः ॥ रसं सविकल्पकानंदं नास्वादयेत् ॥ तदानेनात्रेण कृतार्थता न मन्वीत किंतु प्रज्ञया विवेकबुद्ध्या निःसंगः स
विकल्पकानंदे नासक्तो भवेदित्यर्थः ॥ एवं विघ्नपरिहारे सति यन्निर्विकल्पकसमाधेर्वस्थानं चित्तस्य तत्र गव
त्वाक्योदाहरणेन दर्शयति ॥ यथा दीप इति ॥ एवं विसमाध्यन्तसाधनानुष्ठानपरिपाके सति प्रत्युत्प

वे.सा.
टी.
४६

चक्रभ्रमिरिवाखिलतया कर्तृत्वभोक्तृत्वाभिमानहीनो ऽन्यत् क्वापि पश्यन्निव भासमानोऽपि परमार्थतः स्वं ज्ञानं पश्य
ति ज्ञानेन कर्तृत्वाद्यभिमानमूलाज्ञानस्य बाधितत्वाच्छिन्नमूलत्वादेवाभासमित्यर्थः। बलवत्प्रमुक्तबाणवद्वा
रब्धवत्तफलस्य कर्मणो यावद्वेगहेतुनिवारकाभावात्तद्धीनस्यानुसन्धः पातप्रसंग इति द्रष्टव्यं उक्तमर्थ
दृष्टान्तेन स्पष्टयति। यथेन्द्रजालमिति। बाधितत्वेनेन्द्रजालवन्मिथ्यात्वं मत्वेत्यर्थः। जीवन्मुक्तो देहादिभिर्व्यवहरन्नपि
दृश्यमानोऽपि न परमार्थतो व्यवहरतीत्यत्र श्रुतिं प्रमाणयति। सचक्षुरचक्षुरिवेति। चक्षुरादिमानपि प्रपञ्च
रूपापदर्शनाच्चक्षुरादिहीन इव भवतीत्यर्थः। आदिपदात् देशातिक्रमो जाति इत्यादिश्रुतेरर्थग्रहः। उक्तेऽर्थे

स च जीवन्मुक्तो व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशना
यापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञाना
विरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति। यथेन्द्रजालमिति ज्ञा
नवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण
इव समना अमना इव सप्राणोऽप्राण इवेत्यादिश्रुतेः॥

वीचार्यसंमतिमाह। तदुक्तं सुषुप्तवदिति। जाग्रदवस्थायां द्वैतं पश्यन्नपि सुषुप्तिगतवद्विषयतो न पश्यति स आत्मवि
त् विद्वे... इत्यर्थः। द्वैतस्य बाधितत्वादित्यर्थः। तथाकुर्वन्नपि न करोति यतो निःक्रिय इति योजना
तथा जुवदि... सुषुप्तवज्जाग्रति... तके... ति। नन्वसौ जीवन्मुक्तः इति कथमन्येनावगम्यते इति तत्राह। अस्य ज्ञा
नात्पूर्वं... शुभवासनानामेवानुवृत्तिर्भवतीत्यर्थः। ननु शास्त्र
... हेतु... शुभाशुभयोरौदासीन्यमेवेति। औदासीन्यमुपेत्याहिं सा
ग्रह... नचाभिमानारम्भात् निर्भिन्नजा... अदीनो दीनाकर्मणि तदेवाग्राह्ये

तत्र साक्षात्कारे ... मुक्त एव भवतीत्यत्र प्रमाणमाह। भिद्यत इति॥ हृदयग्रन्थिरहंकारः चिज्जडात्मकत्वाद्ग्र
[illegible] ... संशयाः ... इष्टापि विषयाविच्छिन्नाः अस्यात्मनः कर्माणि जीवन्मुक्तिपक्षे प्रारब्धातिरिक्ता
नि संचितानि क्रियमाणानि च। तथा च न्यायः तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति॥
परममुक्तिपक्षे प्रारब्धसहितान्यपि क्षीयन्ते कदा तस्मिन्निष्प्रपञ्चे पूर्णात्मनि दृष्टे सति साक्षात्कृते सति कथंभूते
परावरे सर्वात्मके अत्र सर्वात्मकत्वमेव न तद्भाति रिक्तस्याभावपरं चावरः स्यादिति वाधायां सामानाधि
करण्यस्य विवक्षितत्वात्। यद्वा परो हिरण्यगर्भः सोऽवरो यस्मात्तस्मिन्परावरे इत्यपूर्वर्णी श्रुत्यर्थः

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेरत्र

आदिपदाद्यस्तु सर्वाणि भूतानि यस्मिन्सर्वाणि भूतानीति च मन्त्रद्वयमीशावास्यगतं परिगृह्यते श्रुतेश्चेतिच
काराद्यपेक्षितास्मृतयोऽपि: यज्ज्ञात्वा न पुनर्मोहं ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति इत्यादिस्मृत
यः समुच्चीयन्ते॥ न च जीवन्मुक्तौ प्रमाणाभावस्तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतै
वमेवेदं शरीरं शेते तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इत्यादिश्रुतेः। प्रजहाति यदा कामान्
प्रकाशं च प्रवृत्तिं चेत्यादिस्मृतेश्च प्रकाशं च प्रवृत्तिं चेत्यादिस्मृतेश्च प्रमाणत्वादिति द्रष्टव्यं॥ ननु जी
न्मुक्तो देहेन्द्रियादिभिर्व्यवहरति न वा आद्ये तस्य बद्धान्न विलक्षणता द्वितीये देहस्यानुपयोगा
त्सद्यः पातप्रसंग इत्यत आह आयुर्विति। प्रारब्धफलानि भुज्यमानानि पूर्वं पूर्वं ... क्रियमाणानि

४८

प्राणो ब्रह्मणि विलीने सति पूर्वसिद्धज्ञानेनैव प्रारब्धकर्मातिरिक्ताज्ञानतत्कार्यतत्संस्काराणामपि विनाशात् संचितकर्मणां ज्ञानेन दाहात् क्रियमाणेष्वश्लेषात् उत्तरेषां तद्धेत्वभावात् परमकैवल्य माह्निनोक्तब्रह्मस्वरूप एवावतिष्ठते विद्वानिति संपिण्डितार्थः ॥ निर्गुणब्रह्मसाक्षात्कारवतः प्राणा नोत्क्रामन्ति किंतु

प्रपन्नतो भवेत्स्यनुसाधनस्वरूपता इति । किं बहुनायं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितम खण्डब्रह्मावतिष्ठते ॥

प्रत्यगब्रह्मण्येवतत्प्राप्यः पीताम्बुवद्विलीयत इत्यत्र प्रमाणमाह ॥ न तस्येति मुक्तेरसाध्यत्वे काठकश्रुतिं प्रमाणयति ॥ विमुक्तश्च विमुच्यत इति ॥ पूर्वमपि मुक्त एव सन्नविद्याप्रत्युपस्थापितनामरूपोपाध्यविवेकनिबन्धनस्य संसाराभासस्य नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयप्रत्यग्ब्रह्मस्वरूपोहमस्मीत्यपरोक्षज्ञानाच्छिन्नत्वादपेक्षया विमुच्यत इत्यर्थः वस्तुतस्तु न बंधो न वा मोक्षः तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न बंधो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ११

विदुषोऽविद्यास [illegible] निर्विघ्नाय वाललाटादि विवहद्दासस्यैकस्मिन्नेव तथाचोदासीनस्यैव मुक्तत्वं तदलं न
विधिपरत्वं [illegible] तस्मिन्मते [illegible] निषिध्यातिक्रमयति भावः विधिनिषेधपूतस्यापरवशत्वं चेन्मुक्तस्य न भवेत्तर्हि येषां
[illegible] प्रीतीत्याशंकाने [illegible] वाक्येन प्रत्याचष्टे तदुक्तं तु इति ॥ सततं च या प्राप्तं यमुमुक्षोरपि नास्ति यथे
ष्टचेष्टा । विदुषो मुक्तस्य कुत एव सा तदप्युक्तं यो हि यत्र विरक्तः स्यान्नासौ तस्मिन्प्रवर्तते लोकत्रयाद्विरक्तत्वान्मुमुक्षुः
किमितीह प्रवर्ततां यथा पीड्यमानोऽपि न विषं भक्षयितुमिच्छति मिष्टान्नध्वस्ततृट् जानन्ना मूढस्तज्जिघत्सति से गोलिंगमबो
धस्य चित्तमायामभूमिषु कुतः शार्दूलनातनस्य यस्मात् अग्निः कोऽरे तत्रैरिल्यादि ॥ नन्वविद्याकार्यत्वात्तत्र [illegible]

तदुक्तं सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः तथा च कुर्वन्नपि निःक्रियश्च यः स आत्मवि[illegible]
न्यस्तीह निश्चय इति ॥ प्रसङ्गान्मानात्पूर्वं विद्यमानानामेव आहारविहारादीनामनुवृत्तिवच्छुभवासनानामे
वानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा तदुक्तं बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि शुनां तत्त्वदृ
शां चैव को भेदोऽशुचिभक्षणे अबोधविद्धितत्त्वस्य तथाशुचिप्रसत्याज्ञानचेत इति तदानीममानित्वादीनि ज्ञान
साधनान्यद्वेष्टृत्वादयः सद्गुणा अलंकारवदनुवर्तन्ते । तदुक्तं उत्पन्नात्मबोधस्य ह्यद्वेष्टृत्वादयो गुणाः

[illegible] विद्यानिवृत्या निवृत्तिवदमानित्वादीनामद्वेष्टृत्वादीनामप्यविद्याकार्यत्वाविशेषान्निवृत्तेरेव
स्यान्नानुवृत्तिरित्याशंक्य नियोगवशादनुवृत्त्याभावेऽपि निवृत्तिपूर्वस्याविरुद्धस्वभावत्वान्न निवर्तेरन्निति तद
र्शयति किं बहुनेति देहस्यात्माऽदृष्टस्थितिः तन्मात्राथीनत्वमिन्द्रियप्रीत्यर्थं सुखदुःखलक्षणो निसुखदुःखसाधना
नि प्रारब्धफलानि भोग्यानि अनुभवन्नसंगतया भुंजानः कथं भुंजान इत्युच्यते अंतः करणाभासादीनां विषयाका
रवृत्तीनां साक्षितया [illegible] सकः सन्निति यावत् तदेव साक्षात्प्रारब्धफलभोगावसाने जाते अप्रयामाभावात्

विद्यासीता वियोगव्यथित निज सुखः शोकमोहाभिपन्नस्त्वेतः सौमित्रिमित्रो
भवगहनगतः प्राप्तसुग्रीवसख्यः हत्वा त्वास्ते दैन्यवालिं मदनजलनिधौ धै
र्यसेतुं प्रबध्य प्रध्वस्ता बोधरक्षःपतिरधिगत विज्ञानकिः स्वात्मारामः ॥ वेदां
तसार विवृत्तिं रामतीर्थाभिधो यतिः चक्रे श्रीकृष्णतीर्थश्रीपदपंकजषट्
पदः ॥ ०॥ इति श्री वेदान्तसार टीका विद्वन्मनोरंजनी समाप्ता ॥ ० ॥ ० ॥

49

50.